# केरळपाठावलिः

# संस्कृतम्

## दशमी कक्ष्या

अक्कादमिक-संस्कृतविद्यालयानां कृते

# KERALA READER
# SANSKRIT

## STANDARD
## 10

For Academic and Sanskrit Schools

Government of Kerala
Department of General Education

State Council of Educational Research and Training (SCERT), Kerala
2019

## राष्ट्रगीतम्

जनगण मन अधिनायक जय हे
भारत भाग्यविधाता।
पंजाब सिन्ध गुजरात मराठा
द्राविड उत्कल बंगा।
विन्ध्य हिमाचल यमुना गंगा
उच्छलजलधि तरंगा।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय-गाथा।
जनगण मंगलदायक जय हे
भारत भाग्यविधाता
जय हे जय हे जय हे
जय जय जय जय हे।

## प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च। मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695 012, Kerala
*Website* : www.scertkerala.gov.in
*e-mail* : scertkerala@gmail.com
Phone : 0471 - 2341883, Fax : 0471 - 2341869
Typesetting and Layout : SCERT; Printed at : KBPS, Kakkanad, Kochi
© Department of Education, Government of Kerala

# भूमिका

प्रिय छात्राः!

परिष्कृता अस्माकं पाठ्यपद्धतिः प्रवर्तनाधिष्ठिता छात्रकेन्द्रीकृता च भवति। छात्राणां सर्वतोमुखविकास एव अस्याः पद्धतेः लक्ष्यम्। तदनुसारमेव पाठ्यक्रमः स्वीकृतः। पाठ्यक्रमे पाठपुस्तकस्य अद्वितीयं स्थानमस्ति। स्वयंपठनाय सङ्घपठनाय भाषानैपुणीनां विकासाय च पाठपुस्तकमुपकरोति।

नवमकक्ष्याया अनुस्यूततया एवास्य पुस्तकस्य रचना प्रवृत्ता। विविधानां व्यवहाररूपाणां परिचायनाय पुस्तकेऽस्मिन् पठनसन्दर्भाः आयोजिताः। पठितानामाशयानां दृढीकरणाय नूतनसन्दर्भेषु प्रयोगाय स्वयं मूल्यनिर्णयाय चावकाशः यथायोग्यं दत्तः।

पाठपुस्तकेऽस्मिन् चत्वारि एककानि सन्ति। विषयानुसारमेव एककानां नामानि। प्रत्येकम् एककस्य प्रारम्भे आमुखम्, प्रवेशकप्रवर्तनं च दत्तमस्ति। पाठस्यान्ते प्रवर्तनानि अधिकपठनांशाः चाक्रिकारोहणप्रक्रिया च दत्तानि। पाठभागे अधिकसूचनार्थं केचन भागाः प्रत्येकं पङ्क्तिषु दत्ताः। एते भागाः अधिकांशस्वीकाराय एव न तु मूल्यनिर्णयाय। एककानामन्ते शब्दकोशः पृथक् दत्तः। पाठभागेष्वागतानां व्याकरणांशानां विवरणं यथास्थानं दत्तमस्ति।

राष्ट्रिय-कर्मनैपुणीपद्धतिं (NSQF) यदृच्छया समागच्छन्तीं दुर्घटनां निवारयितुं समर्थानि, जीवननैपुणीसंवर्धकानि प्रवर्तनानि तथा समग्रशिक्षा द्वारिकायाः कृते सूचना संवेदन तान्त्रिक- (ICT) साध्यताश्च परिगणय्य सम्पुष्टीकृतं वर्तते इदं पाठपुस्तकम्।

भाषापठनं सुगमं सरसं च कर्तुं पाठपुस्तकमिदं पर्याप्तमिति चिन्तयामि। संस्कृतपठनं सर्वदा मधुरं ललितं सफलं च भवतु इति आशासे।

**डा.जे.प्रसाद्**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरळम्।

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरळम्

STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING, KERALA

# विषयानुक्रमणिका


| एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|
| I जीवनम् | १ | आयुरारोग्यसौख्यम्। | (सुभाषितानि)। | ८ |
| | २ | दीनवत्सला जननी। | (कथा)। | १५ |
| | ३ | मधुमान् नो वनस्पतिः। | (विवरणम्)। | २१ |
| II पैतृकम् | ४ | कनकधारा। | (काव्यम्)। | ३० |
| | ५ | जयन्ति ते सुकृतिनः। | (जीवचरितम्)। | ४२ |
| | ६ | रागसुधारस.....। | (विवरणम्)। | ४९ |
| III साहिती | ७ | काव्यमुक्तावलिः। | (काव्यम्)। | ५८ |
| | ८ | शिवास्ते सन्तु पन्थानः। | (नाटकम्)। | ७५ |
| IV संस्कृतिः | ९ | ईशोपदेशः। | (काव्यम्) । | ९१ |
| | १० | प्राप्य वरान् निबोधत। | (उपनिषत्)। | १०१ |

## शब्दमहत्वम्।

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।।

## वाग्मित्वम् ।

मितं च सारं च वचो हि वाग्मिता ।

## वाङ्महिमा ।

एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः
स्वर्गे लोके कामधुग्भवति।

एककम्
१

# जीवनम् ।

## आमुखम् ।

पृथिव्यां सर्वाणि जीवजालानि स्वजीवसन्धारणाय यतन्ते। मानवराशेः जीवातुभूतं भवति अन्नं जलं प्राणवायुश्च। एतेषां लाभेन केवलं जीवसन्धारणमेव शक्यम्। आरोग्यसंरक्षणाय व्यायामादीनि सर्वदा आचरणीयानि। तद्वद् जीविनां परस्पराश्रयत्वं परस्परस्नेहश्च जीवनाय अत्यन्तापेक्षितं भवति। केचन सविशेषं साहाय्यमर्हन्ति। तेऽपि सामान्यधारामानयनीयाः। न केवलं मानवानाम् अपि तु वृक्षलतादीनामपि संरक्षणं प्रपञ्चसुस्थित्यै अनिवार्यं भवति।

जीवनं नामके अस्मिन्नेकके आरोग्यसम्बन्धीनि सुभाषितानि समाहृत्य **आयुरारोग्यसौख्यम्** इति पाठः, महाभारतकथायाः समाकलिता **दीनवत्सला जननी** इति कथापाठः, **मधुमान् नो वनस्पति**रिति वृक्षायुर्वेदसम्बन्धी उपन्यासपाठश्च अन्तर्भाविताः।

**प्रवेशकम् - आरोग्यसंरक्षणे किं किं करणीयमिति विषये चर्चां प्रचालयतु।**

# पाठः १

# आयुरारोग्यसौख्यम्।



**आमुखम्**

युष्माभिः सुभाषितानि, मुक्तकानि च पठितानि खलु। धार्मिकमूल्यानि स्वायत्तीकर्त्तुं, स्वजीवने प्रयोक्तुं च सुभाषितानि प्रयोजनप्रदानि। अत्र सुभाषितावलिः, चरकसंहिता, महाभारतम्, चाणक्यनीतिः इत्यादिभ्यः आरोग्यविषयाधिष्ठितानि कानिचन सुभाषितानि समाकलितानि। अनुभवसहस्रेभ्यः आर्जितं विज्ञानमेव सुभाषितैरुद्घुष्यते।

**परिश्रमो मिताहारो**
**भूगतावश्विनीसुतौ ।**
**तावनादृत्य नैवाहं**
**वैद्यमन्यं समाश्रये।। १** (सुभाषितावलिः)

### पदच्छेदः

| | | |
|---|---|---|
| परिश्रमो मिताहारः | - | परिश्रमः + मिताहारः। |
| भूगतावश्विनीसुतौ | - | भूगतौ + अश्विनीसुतौ। |
| तावनादृत्य | - | तौ + अनादृत्य। |
| नैवाहम् | - | न + एव + अहम् । |

### विग्रहः

| | | |
|---|---|---|
| मिताहारः | - | मितश्च असौ आहारः च। |

| अन्वयः | अन्वयार्थः |
|---|---|
| परिश्रमः मिताहारः | व्यायामः आहारमितत्वं च |
| भूगतौ अश्विनीसुतौ (भवतः)। | भूमौ आगतौ अश्विनीकुमारौ (देववैद्यौ) भवतः । |
| तौ अनादृत्य | तयोः अनादरं कृत्वा |
| अन्यं वैद्यम् | इतरं वैद्यम् |
| अहं नैव समाश्रये। | अहं न कदापि आश्रयार्थं प्राप्नुयाम्। |

### भावार्थः

व्यायामः मिताहारः च आरोग्याय अत्युत्तमं भवति। तौ अश्विनीकुमारकल्पौ वैद्यश्रेष्ठौ भवतः। ये जनाः एतद्द्वयम् अनुशीलयन्ति तेषां कृते अन्यस्य वैद्यस्य आवश्यकता नास्ति इत्याशयः।

### क्रिया

समाश्रये - सम् + आङ् श्रिञ् सेवायां आत्मनेपदी लट् उ. पु. ए .व।

**शनैरर्थः शनैः पन्थाः**
**शनैः पर्वतमारुहेत्।**
**शनैर्विद्या च धर्मश्च**
**व्यायामश्च शनैः शनैः।** २ (चाणक्यनीतिः)

### पदच्छेदः

शनैरर्थः - शनैः + अर्थः।
शनैर्विद्या - शनैः + विद्या।

| अन्वयः | अन्वयार्थः |
|---|---|
| अर्थः शनैः | धनं कणशः सम्पादनीयम् |
| पन्थाः शनैः | मार्गः मन्दं गन्तव्यः |
| शनैः पर्वतम् आरुहेत् | पर्वतः अवधानतया आरोहणीयः |
| विद्या शनैः | विद्या निरन्तराभ्यासेन सम्पादनीया |
| धर्मः शनैः च | धर्मः विवेचनशीलेन आचरणीयः |
| शनैः व्यायामः च | (तथा) व्यायामः अवधानेन करणीयः च। |

### भावार्थः

वित्तं कणशः सम्पादनीयम्। मार्गेण मन्दं मन्दं गन्तव्यम्। पर्वतारोहणम् अवधानतया करणीयम् । विद्या कालक्रमेण सम्पादनीया। युक्तायुक्तविवेचनेन धर्मः आचरणीयः । एवं व्यायामश्च मन्दमेव करणीयः ।

**ईर्ष्याभयक्रोधसमन्वितेन**
**लुब्धेन रुग्दैन्यनिपीडितेन।**
**विद्वेषयुक्तेन च सेव्यमानम्**
**अन्नं न सम्यक् परिपाकमेति।।** ३ (चरकसंहिता)

### विग्रहः

ईर्ष्याभयक्रोधसमन्वितेन - ईर्ष्या च भयश्च क्रोधश्च एषां समाहारः
ईर्ष्याभयक्रोधम्, तेन समन्वितः ।
ईर्ष्याभयक्रोधसमन्वितः, तेन ।

रुग्दैन्यनिपीडितेन - रुजा दैन्येन च निपीडितः रुग्दैन्यनिपीडितः, तेन।

| अन्वयः | अन्वयार्थः |
|---|---|
| ईर्ष्याभयक्रोधसमन्वितेन | परोत्कर्षासहिष्णुता, भीतिः, अमर्षः च इत्येतैः युक्तेन । |
| लुब्धेन | लोलुपेन। |
| रुग्दैन्यनिपीडितेन | रोगदुःखादिभिः दुःखितेन। |
| विद्वेषयुक्तेन च | वैरयुक्तेन च। |
| सेव्यमानम् | भुज्यमानम्। |
| अन्नं सम्यक् | आहारः युक्तरूपेण। |
| न परिपाकमेति। | न परिपक्वतां याति। |

**भावार्थः**

अक्षान्तैः, भीतियुक्तैः, अमर्षयुक्तैः, लोलुपैः, रोगग्रस्तैः, दीनैः, वैरचिन्तायुक्तैः च तत्तदवस्थायां सेव्यमानम् अन्नं सम्यक् दग्धं न भवति। भोजनावसरे ईर्ष्यादिभावनां विहाय स्वस्थः भवेद् इत्याशयः।

**कोशः**

ईर्ष्या - अक्षान्तिरीर्ष्यासूया तु दोषारोपो गुणेष्वपि ।
भयम् - दरस्त्रासो भीतिर्भीः साध्वसं भयम्।
क्रोधः - कोपक्रोधामर्षरोषप्रतिखारुट्क्रुधौ स्त्रियौ।

**क्रिया**

एति - इण् गतौ लट् परस्मैपदी प्र. पु. ए. व।
एति - इतः - यन्ति।

**आत्मानमेव मन्येत**
**कर्तारं सुखदुःखयोः ।**
**तस्माच्छ्रेयस्करं मार्गं**
**प्रतिपद्येत न त्रसेत्।।** ४ (चरकसंहिता)

**पदच्छेदः**

तस्माच्छ्रेयस्करम् - तस्मात् + श्रेयस्करम्।

**विग्रहः**

सुखदुःखयोः - सुखं च दुःखं च सुखदुःखे, तयोः ।

| अन्वयः | अन्वयार्थः |
|---|---|
| सुखदुःखयोः कर्तारम् | सुखस्य दुःखस्य च कर्तारम्। |
| आत्मानमेव मन्येत। | स्वयमेव इति अवगच्छेत्। |
| तस्मात् श्रेयस्करं मार्गम् | तस्मात् महत्तरं पन्थानम् |
| प्रतिपद्येत | प्राप्स्येत। |
| न त्रसेत् । | मा भैषीः (भीः)। |

**भावार्थः**

जीविते सुखस्य दुःखस्य च हेतुः स्वस्य कर्म एवेति अवगच्छेत्। एवं तर्हि महत्तरं पन्थानं प्राप्नुयात्। एतद्विषये भयस्य आवश्यकता नास्ति इत्याशयः।

**क्रिया**

प्रतिपद्येत - प्रति + पत्लृ गतौ वि.लिङ्. आत्मनेपदी प्र. पु. ए. व।

मन्येत - मन अवबोधने आत्म वि. लिङ् प्र. पु. ए. व।

त्रसेत् - त्रस उद्धरणे विधिलिङ् परस्मैपदी प्र. पु. ए. व।

**धन्यानामुत्तमं दाक्ष्यं**
**धनानामुत्तमं श्रुतम्।**
**लाभानां श्रेष्ठमारोग्यं**
**सुखानां तुष्टिरुत्तमा।।** ५ (महाभारतम्)

**पदच्छेदः**

तुष्टिरुत्तमा - तुष्टिः + उत्तमा ।

| अन्वयः | अन्वयार्थः |
|---|---|
| धन्यानां दाक्ष्यम् उत्तमम् | कृतकृत्येषु सामर्थ्यं श्रेष्ठम् |
| धनानां श्रुतम् उत्तमम् | धनेषु शास्त्रं श्रेष्ठम्। |
| लाभानाम् आरोग्यं श्रेष्ठम् | लाभेषु स्वास्थ्यं प्रधानम् |
| सुखानां तुष्टिः उत्तमा (भवति)। | सुखेषु तृप्तिः श्रेष्ठा भवति। |

**भावार्थः**

कृतकृत्येषु सामर्थ्यं , धनेषु शास्त्रज्ञानसम्पादनं, लाभेषु स्वास्थ्यं, सुखेषु तृप्तिः च श्रेष्ठानि इत्याशयः।

**कोशः**

धन्यः - सुकृती पुण्यवान् धन्यः।

# पठनप्रवर्तनानि ।

**सुभाषितानि विविधया रीत्या सतालम् आलपतु।**

**श्रद्धेयाः अंशाः**

अक्षरस्फुटता।

पदच्छेदः।

आलपनसामर्थ्यम्।

**पाठभागस्थानां श्लोकानां गद्यक्रमं लिखतु।**

**श्रद्धेयाः अंशाः**

अन्वयक्रमः।

आशयावगमनम्।

आशयसंग्रहः ।

**पाठभागस्थानां श्लोकानामाशयाः मानवजीवने कथमुपकुर्वन्ति इति विषये चर्चां कृत्वा टिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः**

आशयलेखनम्।

तुलनम् ।

समर्थनम् ।

**पठितेषु इष्टतमस्य श्लोकस्य आस्वादनटीकां लिखतु ।**

**श्रद्धेयाः अंशाः**

आमुखम्।

आशयलेखनम्।

ईप्सितस्य कारणम् (स्वाभिप्रायः)।

**विविधाशययुक्तानि सुभाषितानि सञ्चित्य सम्पुटम् आरचयतु ।**

**कक्ष्यायाम् अवतारयतु ।**

**श्रद्धेयाः अंशाः**

आमुखम् ।

आशयपूर्णता ।

औचित्यम् ।

**अधिकविस्तरः -**

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
रीतिरेषा हि विद्यानां धर्मस्य च धनस्य च ।।

## चाक्रिकारोहणप्रक्रिया ।

**मातृवात्सल्यमधिकृत्य सुभाषितं वा कवितां वा सतालमालपतु।**


# पाठः २

# दीनवत्सला जननी।



## आमुखम्

उपदेशात्मिकाभिः कथाभिः सम्पुष्टं भवति महाभारतम्। दुर्योधनकृतं पाण्डवद्रोहं पश्यन् व्यासः धृतराष्ट्रमुपेत्य दीनाः पाण्डवाः सविशेषश्रद्धामर्हन्ति इत्युपदिशति। भाषणमध्ये कथामेकाञ्च कथयति। महाभारतस्य वनपर्वान्तर्गता कथेयं दीनानुकम्पां प्रतिपादयति। न केवलं समाजेषु किन्तु परिवारेष्वपि व्यक्तिभेदः दरीदृश्यते । तत्रापि अवश्यं सविशेषश्रद्धा देया इति कथेयम् अस्मान् उद्बोधयति।।



कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन ताडयन् नुद्यमानः अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारमताडयत्। तथापि वृषः नोत्थितः।

कृषकेण ताडितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्। सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्- " अयि शुभे! किमेवं रोदिषि ? उच्यताम् " इति। सा च - "भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। ताडनमपि सहते। इतरः इव धुरं वोढुं सः न शक्नोति च। एतत् भवान् पश्यति न?" इति प्रत्यवोचत्।

"भद्रे! नूनम्। परं यद्यपि सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्?" इति इन्द्रेण पृष्टा सुरभिः प्रत्यवोचत्– " बहून्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अत्यधिका कृपा सहजैव " इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्य हृदयमद्रवत्। स तामेवमसान्त्वयत् च - " गच्छ वत्से! सर्वं भद्रं जायेत।"

अचिरादेव चण्डवातेन मेघारवैश्च सह प्रवर्षः समजायत। पश्यतामेव सर्वत्र जलोपप्लवः सञ्जातः। कृषकः प्रयत्नविघ्नेन कर्षणविमुखः सन् वृषभौ नीत्वा गृहमगात्।

**अपत्येषु च सर्वेषु**
**जननी तुल्यवत्सला।**
**पुत्रे दीने तु सा माता**
**कृपार्द्रहृदया भवेत्।।**



**पदच्छेदः**

| | | |
|---|---|---|
| कुर्वन्नासीत् | - | कुर्वन् + आसीत्। |
| तयोरेकः | - | तयोः + एकः। |
| असमर्थश्चासीत् | - | असमर्थः + च +आसीत्। |
| नोत्थितः | - | न + उत्थितः । |
| दुःखिताभूत् | - | दुःखिता + अभूत्। |
| सुरभेरिमामवस्थाम् | - | सुरभेः + इमाम् + अवस्थाम्। |
| सत्स्वपि | - | सत्सु + अपि। |
| तस्मिन्नेव | - | तस्मिन् + एव। |
| तथाप्येनम् | - | तथा + अपि + एनम्। |
| अन्येभ्यो दुर्बलः | - | अन्येभ्यः + दुर्बलः। |
| सर्वेष्वपत्येषु | - | सर्वेषु + अपत्येषु। |
| सहजैव | - | सहजा + एव। |
| विस्मितस्याखण्डलस्यापि | - | विस्मितस्य + आखण्डलस्य + अपि। |
| मेघारवैश्च | - | मेघारवैः + च। |

### विग्रहवाक्यानि

तुल्यवत्सला – तुल्यं वात्सल्यं यस्याः सा।
कृपार्द्रहृदया – कृपया आर्द्रं हृदयं यस्याः सा।
सुराधिपः – सुराणाम् अधिपः।

## पठनप्रवर्तनानि।

**मातृवात्सल्यप्रतिपादिकां कथामेकां सम्भाव्य रचयतु, कक्ष्यायाम् अवतारयतु।**

**श्रद्धेयाः अंशाः**

**क)** विषयानुबन्धिता। **ख)** उचितभाषाप्रयोगः। **ग)** आशयपूर्तिः।

***'अपत्येषु च सर्वेषु जननी तुल्यवत्सला'*** **-प्रस्तावस्यास्य साधुताम् अधिकृत्य चर्चां कृत्वा टिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः**

**क)** चर्चा। **ख)** लेखनम्। **ग)** अवतारणम्।

**अधोदत्तेषु शतृ-शानजन्तरूपाणि विविच्य पट्टिकां रचयतु।**

| | | | |
|---|---|---|---|
| नुद्यमानः | गच्छन् | पठन् | गम्यमानः |
| पचन् | कम्पमानः | वन्दमानः | रुदन् |
| पचमानः | ताडयन् | जल्पमानः | प्रेरयन् |

| शत्रन्तम् | शानजन्तम् |
|---|---|
| | |

**कार्षिकवृत्तेः आधुनिकरीतिं परम्परागतरीतिं चाधिकृत्य चर्चां कृत्वा टिप्पणीं लिखतु।**

श्रद्धेयाः अंशाः -

**क)** चर्चा। **ख)** लेखनम्। **ग)** अवतारणम्। **घ)** भाषाशुद्धिः ।

**पाठभागात् पाठान्तरेभ्यश्च लङ् रूपाणि चित्वा तेषां लट् लोट् रूपाणि उदाहरणानुसारं लिखतु।**

| लङ् | लट् | लोट् | विधिलिङ् |
|---|---|---|---|
| अत्रसत् | त्रसति | त्रसतु | त्रसेत् |

**उदाहरणानुसारं वाक्यं परिवर्तयतु।**

उदा- मातुः बहवः पुत्राः सन्ति। दीने पुत्रे कृपार्द्रहृदया अस्ति।

**यद्यपि** मातुः बहवः पुत्राः **तथापि** दीने पुत्रे कृपार्द्रहृदया अस्ति।

१ अहं पाठं सुष्ठु अपठम्। पूर्णमङ्कं न सम्प्राप्तवान्।

२ राजुः यथासमयं बस्निस्थानं गतः। बस्यानं न अलभत।

३ पितामहः सम्पूर्णमौषधम् अपिबत्। रोगशमनं नाभवत्।

४ वृक्षे अनेकानि फलानि सन्ति। कानिचित् उपयोगशून्यानि भवन्ति।

५ जनाः चित्रशालाम् अगच्छन्। तत्र वैद्युतिः नासीत्।

**मातृवात्सल्यसम्बन्धिनीनां कथानां तत्कर्तॄणाञ्च नामानि समाहृत्य पट्टिकां करोतु।**

**श्रद्धेयाः अंशाः**

**क)** चयनसामर्थ्यम् । **ख)** पट्टिकाकरणम्। **ग)** अवतारणम्।

**वृषभः , नेत्रं, कृषकः, माता, पुत्रः, वासवः इत्यर्थेषु प्रयुक्तानि समानार्थकपदानि पाठभागात् सञ्चित्य लिखतु।**

**श्रद्धेयाः अंशाः**

**क)** चयनसामर्थ्यम् । **ख)** अर्थावगमनम् **ग)** लेखनम्। **घ)** अवतारणम्।

**पाठभागात् सम्बोधनरूपाणि चित्वा लिखतु।**

**श्रद्धेयाः अंशाः**

**क)** चयनसामर्थ्यम् । **ख)** पट्टिकाकरणम्। **ग)** अवतारणम्।

## अनुबन्धः

### अमरकोशः

| | | |
|---|---|---|
| कृषकः | – | क्षेत्राजीवः कर्षकश्च कृषकश्च कृषीवलः। |
| वृषभः | – | उक्षा भद्रे बलीवर्द ऋषभो वृषभो वृषः। अनड्वान् सौरभेयो गौः । |
| तोदनम् | – | प्राजनं तोदनं तोत्रम्। |
| हलम् | – | लाङ्गलं हलं गोदारणं च सीरः। |
| धूः | - | धूः स्त्री क्लीबे यानमुखं स्यात्। |
| सुरः | – | अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः । |
| वासवः | – | सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा। |
| पुत्रः | – | आत्मजस्तनयः सूनुः सुतः पुत्रः। |
| कृपा | – | कारुण्यं करुणा घृणा कृपा दयानुकम्पा स्यादनुक्रोशोऽपि। |
| जननी | – | जनयित्री प्रसूर्माता जननी। |

**धातुपरिचयः** अवोचत् – ब्रूञ् व्यक्तायां वाचि परस्मैपदी लुङ्।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु | अवोचत् | अवोचताम् | अवोचन् |
| म.पु | अवोचः | अवोचतम् | अवोचत |
| उ.पु | अवोचम् | अवोचाव | अवोचाम। |

वक्ति इति लट् लकारे प्रथमपुरुषैकवचनम्।

**महाभारतस्य पर्वणां नामानि**

आदि - सभा - वन - विराट - उद्योग- भीष्म - द्रोण - कर्ण - शल्य - सौप्तिक- स्त्री - शान्ति- अनुशासन - अश्वमेधिक - आश्रमवासिक-मौसल- महाप्रस्थानीय- स्वर्गारोहणपर्वः।

### चाक्रिकारोहणप्रक्रिया ।

**सर्वाण्यपि चराचराणि प्रकृतिभूतानि भवन्ति खलु? चर्चां करोतु।**

## पाठः ३



# मधुमान् नो वनस्पतिः।







### आमुखम्।

पौराणिकभारतीयाः सस्यसंरक्षणविषये दत्तश्रद्धाः आसन्। जीवनसंरक्षणे संस्कृतीनां पोषणे च सस्यानां प्रमुखस्थानं तैः कल्पितम्। **नास्ति सस्यमनौषधम्** इति ज्ञातवन्तस्ते गृहं परितः विविधानि सस्यानि रोपयित्वा परिपालयन्ति स्म। तुलसी-निम्ब-अशोक-आमलकी-हरिद्रादयः प्रायेण समेष्वपि गृहेषु रोपिताः। अपि च हरिद्रा सर्वविषहारिणी, आमलकी ऊर्जप्रदायिनी, निम्बः व्रणनाशकः, तुलसी विषहारिणी इत्येवम् औषधगुणान् विज्ञाय तेषां गुणप्रभेदाञ्चाधिकृत्य बहुधा चर्चितवन्तः ग्रन्थान् विरचितवन्तः चासन् पूर्विकाः। कांश्चिद् अभिप्रायान् पश्यन्तु।







**दशकूपसमा वापी दशवापीसमो ह्रदः।**
**दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः।।**

इति तरुमहिमानमधिकृत्य प्रथा सुविदिता खलु। सस्यानां परिपोषणे श्रद्धालूनां प्राक्तनभारतीयानां सामान्योऽभिप्राय एवात्र परामृष्टः। उक्तिरियम् आचार्यस्य सुरपालस्य वृक्षायुर्वेदः इति प्रसिद्धे ग्रन्थे दृश्यते।

प्रकृत्यंशो विवेकशाली मानवः स्वजीवनपरिस्फूर्तये परितः स्थितानां सस्यानां साहाय्यम् अत्यन्तापेक्षितमिति यावत् बुबोध तावदारभ्य सस्यसंरक्षणे जागरूकोऽभवत्। भोजनाय, पर्णकुटीनिर्माणाय, नग्नताच्छादनाय, आरोग्यपरिपालनाय च स सस्यानि आशिश्रिये। अपि च तानि सर्वाणि औषधगुणयुक्तानि इति विशेषज्ञानमपि सः कालक्रमेण सम्पादितवान्। तत् सस्यशास्त्राणां प्रादुर्भावे कारणम् अभवत्।अतः सस्यानां संरक्षणपोषणादीनि तस्य कर्तव्यानि अभवन्।



ऋग्वेदे, शतपथब्राह्मणे, तैत्तिरीयसंहितायां च भारतीयसस्यविज्ञानस्य प्राग्रूपं दृश्यते। महाभारते शान्तिपर्वणि सस्यानि मानवा इव सुखदुःखान्यनुभवन्ति इति प्रस्तुतम्। सस्यविज्ञानमधिकृत्य विरचितेषु ग्रन्थेषु सुरपालस्य 'वृक्षायुर्वेदः' प्रसिद्धोऽस्ति। त्रयोदशाध्यायैः सम्पन्नेऽस्मिन् ग्रन्थे तरुमहिमा, भूमिनिरूपणम्, बीजसंरक्षणविधिः, सस्यानां पोषणं, रोगचिकित्सादयश्च पृथक् पृथक् विशदीक्रियन्ते।



सस्यानि सर्वाणि प्रमुखतया वृक्षः, वनस्पतिः, वीरुत्, ओषधिः इति भेदेन चतुर्धा विभक्तानि। यस्मिन् फलात्पूर्वं पुष्पाणि स्पष्टं दृश्यन्ते स वृक्षः इति कथ्यते। अव्यक्तपुष्पः यः फलति स एव वनस्पतिः। प्रतानैः प्रसारिता वीरुत्। फलपाकान्ता ओषधिश्च। आम्रजम्ब्वादयः वृक्षाः, पनसोदुम्बरादयः वनस्पतयः, कूश्माण्डकर्कट्यादयः वीरुधः, व्रीहिगोधूमादयः ओषध्यश्चेति प्रसिद्धाः। सस्यानां संरक्षणं सर्वथा सर्वदा करणीयमिति उद्बोधयन्तः प्राक्तनाः एवं प्रार्थितवन्तः -

**मधुमान् नो वनस्पतिः मधुमानस्तु सूर्यः।**
**माध्वीर्गावो भवन्तु नः।।**



## पदच्छेदः

| | | |
|---|---|---|
| उक्तिरियम् | - | उक्तिः + इयम् । |
| ग्रन्थादुद्धृता | - | ग्रन्थात् + उद्धृता |
| जागरूकोऽभवत् | - | जागरूकः+ अभवत्। |
| हेतुरभूत् | - | हेतुः +अभूत्। |
| प्रसिद्धोऽस्ति | - | प्रसिद्धः+ अस्ति। |
| सम्पन्नेऽस्मिन् | - | सम्पन्ने +अस्मिन् । |
| ओषधिश्च | - | ओषधिः +च। |
| ओषध्यश्चेति | - | ओषध्यः + च + इति। |
| सुखदुःखान्यनुभवन्ति | - | सुखदुःखानि + अनुभवन्ति। |
| प्रभेदाश्च | - | प्रभेदाः + च। |
| नो वनस्पतिः | - | नः + वनस्पतिः। |

## अधिकविस्तरः

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः।
माध्वीर्नः सन्त्वोषधीः मधु नक्तमुतोषसो।।
मधुमत्पार्थिवं रजः मधु द्यौरस्तु नः पिता।
मधुमान् नो वनस्पतिः मधुमानस्तु सूर्यः।
माध्वीर्गावो भवन्तु नः।। ऋग्वेदः१-६-१८(६-८)

### विग्रहवाक्यानि

तरुमहिमानम् - तरोः महिमा, तम्।
विवेकशाली - विवेकेन शालते यः, सः।
स्वजीवनपरिस्फूर्तये - स्वस्य जीवनम्, तस्य परिस्फूर्तिः, तस्यै।

## पठनप्रवर्तनानि।

**सस्यसम्बन्धीनि सुभाषितानि समाहृत्य सम्पुटं रचयतु।**

**श्रद्धेयांशाः**

१) विषयबन्धिता।
२) औचित्यम्।
३) क्रमीकरणचारुता।

**"सर्वाणि सस्यानि औषधगुणयुक्तानि" - इति विषयमधिकृत्य चर्चां कृत्वा केषाञ्चन औषधसस्यानां नाम गुणान् च लिखतु।**

**श्रद्धेयांशाः**

१) सर्वेषां भागभागित्वम्।
२) आशयपूर्णता।
३) भाषाशुद्धिः।

**प्रकृतिसंरक्षणे सस्यानां प्रसक्तिः इति विषयमधिकृत्य संगोष्ठीं चालयतु।**

**सूचनाः**-मृत्स्खलनम्, वनसंरक्षणम्, अन्तरीक्षसंरक्षणम्, आगोलतापनम्।

**श्रद्धेयांशाः**

१) सर्वेषां भागभागित्वम्।
२) आशयपूर्णता।
३) भाषाशुद्धिः।

**प्रकृतिसंरक्षणे सस्यानां प्रसक्तिमधिकृत्य भित्तिपत्रिकां रचयतु।**

उदा- वृक्षान् रोपयन्तु, प्रकृतिं संरक्षन्तु।

**श्रद्धेयांशाः**

१) समुचितमुद्रावाक्यस्य निवेशनम्।

२) आशयपूर्णता।

३) आकर्षकत्वम्।

४) ऐ.सि.टी साध्यतानां संयोजनम्।

**वृक्षः, वनस्पतिः, वीरुत्, ओषधिः इति क्रमेण सस्यानां पट्टिकां करोतु।**

कदली, पनसः, द्राक्षा, पूगः , अश्वत्थः, इक्षुः, आम्रः, कर्कटी, गोधूमः , यावनालः(चोलम् इति कैरल्याम्), व्रीहिः , नालिकेरः , कूश्माण्डः।

**श्रद्धेयांशौ**

१) समग्रता ।

२) औचित्यम् ।

## कोशः

द्रुमः - वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।
अनोकहः कुजः सालः पलाशी द्रुद्रुमागमाः।।

वीरुत् - लता प्रतानिनी वीरुत्।

ओषधी - ओषध्यः फलपाकान्ताः।

उक्तिः - व्याहार उक्तिर्लपितं भाषितं वचनं वचः।

अभिप्रायः - अभिप्रायः छन्दः आशयः। (अमरकोशः)

आमलकी - आमलकी वयःस्था च श्रीफला धात्रिका तथा
अमृता च शिवा शान्ता । (राजनिघण्टुः)

### सस्यभेदानधिकृत्य सुरपालः ।

**‘ये वनस्पतयः प्रोक्ता विना पुष्पैः फलन्ति ये।**
**द्रुमाश्च ते निगदिताः पुष्पैः सह फलन्ति ये ।।**
**प्रसरन्ति प्रतानैर्यास्ता लता परिकीर्तिता।**
**बहुस्तम्भा विटपिनो ये ते गुल्माः प्रकीर्तिताः ’।।**

**शब्दविशेषः**

**ओषधिः** -इकारान्तस्त्रीलिङ्गः शब्दः। जातिविषयत्वात् ङीष् च।
तत्र **ओषधी** इति ईकारान्तरूपमपि साधु।

**धातुपरिचयः**

**आशिश्रिये** - आ(ङ्) इत्युपसर्गपूर्व श्रिञ् -सेवायाम् इति धातोः आत्मनेपदी लिट् प्र.पु.ए.व।

| एकवचनम् | द्विवचनम् | बहुवचन् |
|---|---|---|
| आशिश्रिये | आशिश्रियाते | आशिश्रियिरे |
| आशिश्रियिषे | आशिश्रियाथे | आशिश्रियिढ्वे |
| आशिश्रिये | आशिश्रियिवहे | आशिश्रियिमहे । |

## अभ्यासपत्रिका - १

1) **यथोचितं योजयत।**

| | |
|---|---|
| चरकसंहिता | सुरपालः । |
| ऋषभः | वनस्पतिः । |
| वृक्षायुर्वेदः | शानजन्तम् । |
| नुद्यमानः | बलीवर्दः । |
| पनसः | चरकः । |

2) **उदाहरणानुसारं वाक्यम् परिवर्तयत।**

स शरीरेण दुर्बलः। मनसा शक्तः भवति । (यद्यपि - - - - - तथापि)।

**उदा-** यद्यपि स शरीरेण दुर्बलः तथापि मनसा शक्तः भवति।

**अ)** स दरिद्रः, दानशीलः भवति।

**आ)** पुस्तकमतिमनोहरम् । मूल्यन्तु तुच्छम्।

**इ)** वर्षाकालः समागतः। वृष्टिः नास्ति।

3) **वृक्षाणां प्रभेदमधिकृत्य सूचनानुसारं पूरयत।**

**सूचनाः -** सस्यानि प्रमुखतया...........विभक्तानि। ............... ..........वीरुत् ...........इति। अव्यक्तपुष्पः.........। ............वृक्षाः। ................ वनस्पतयः। कूष्माण्डादयः वीरुधः। व्रीह्यादयः ................।

4) **उदाहरणानुसारं पूरयत।**

**उदा -**

| | |
|---|---|
| अस्ति | आसीत् |
| ताडयति | ............ |
| ............ | अपीडयत् |
| द्रवति | ............ |
| ............ | अजायत |
| पृच्छति | ........... |

## किमधिगतम् ?

निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्

| क्रम-संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

## शब्दकोशः -

| संस्कृतम् | संस्कृतम् | कैरली | आङ्गलेयम् | कन्नटम् |
|---|---|---|---|---|
| अनादृत्य | अनादरं कृत्वा | അനാദരിച്ചിട്ട് | having not respected | ತಿರಸ್ಕೃತ |
| उदुम्बरः | उटुम्बरवृक्षः | അത്തി | Cluster fig tree | ಅಂಜೂರದ |
| कर्कटी | शाकविशेषः | കക്കിരിക /വെള്ളരി | Cucumis | ಗೊಂಚಲು |
| कूश्माण्डः | शाकविशेषः | കുമ്പളങ്ങ | Pumpkin | ಕುಂಬಳ ಕಾಯಿ |
| कृच्छ्रेण | कष्टेन | പ്രയാസപ്പെട്ട് | With difficulty | ಕಷ್ಟದಿಂದ |
| जलोपप्लवः | जलक्षोभः | വെള്ളപ്പൊക്കം | Flood | ಪ್ರವಾಹ |
| जागरूकता | प्रबुद्धता | ഉണർവ്വ് | Vigilance | ಬುದ್ಧಿ |
| तोदनम् | तोत्रम् | ചാട്ട | Whip | ಚಾಟ್ಟೇ |
| द्रुमः | वृक्षः | മരം | Tree | ಮರ |
| धूः | भारः | ഭാരം | Weight | ಭಾರ |
| परिपाकम् | दग्धं | ദഹിച്ചത് | Fully digested | ಂಪೂರ್ಣಜೀರ್ಣಗೊಂಡ |
| परिस्फूर्तिः | साफल्यम् | സാഫല്യം | Manifestation | ಪರಿಪೂರ್ಣ |
| प्रथा | कीर्तिः | കീർത്തി | Fame | ಕೀರ್ತಿ |
| प्रवर्षः | अतिवृष्टिः | പെരുമഴ | Heavy Rain | ಅಧಿಕ ಮಳೆ |
| प्रादुर्भावः | उत्पत्तिः | ഉത്പത്തി | Origin | ಬಾಹ್ಯ ಚಹರೆ ನೋಟ |
| देही | शरीरी | ജീവി | Creature | ಜೀವಿ / ಜಂತು |
| दाक्ष्यम् | सामर्थ्यम् | സാമർഥ്യം | Efficiency | ಸಾಮಥ್ರ್ಯ |
| विद्वेषः | वैराग्यम् | വൈരാഗ്യം | Enmity | ವೈರಾಗ್ಯ |
| मार्गः | पन्था | വഴി | Route | ದಾರಿ |
| रुक् | रोगः | രോഗം | Disease | ರೋಗ |
| क्षेत्रकर्षणम् | भूविदारणम् | നിലം ഉഴുതുക | Ploughing | ಗದ್ಧೆ ಉಳುವುದು |
| वैद्यः | भिषक् | വൈദ്യൻ | Doctor | ವೈದ್ಯ |
| वनस्पतिः | वृक्षः | വൃക്ഷം | tree | ಸಸ್ಯ |
| व्रीहिः | धान्यम् | ധാന്യം | Grain | ದಾನ್ಯ |
| गोधूमः | गोतम्प् | ഗോതമ്പ് | Wheat | ಗೊಧಿ |
| कृषीवलः | कृषकः | കർഷകൻ | Farmer | ರೈತ |
| ह्रदः | आगाधजलाशयः | തടാകം | Lake | ಸರೊವರ |
| वीरुत् | लता | വള്ളി | Creeper | ಲತೆ / ಬಳ್ಳಿ |
| भूगतौ | भूमौ आगतौ | ഭൂമിയിൽ വന്നവർ | Came in Eath | ಭೂಮಿಯಲ್ಲಿ ಜನಿಸಿದ |

एककम्
२

# पैतृकम्।

## आमुखम्।

अस्माकं मातृभूमेः सांस्कृतिकपैतृकं महत्तरं भवति। विश्वे न कस्यापि राष्ट्रस्य एतत्समानं पैतृकमस्ति। वेदेतिहासपुराणादीनि अस्मत्संस्कृतेर्निदानभूतानि भवन्ति।

पैतृकनामधेये अस्मिन्नेकके माधवविद्यारण्यस्वामिना विरचितस्य शङ्करदिग्विजयाख्यस्य काव्यस्यांशः **कनकधारा** नाम्ना, संस्कृतभाषाप्रणयिनां त्रयाणां महात्मनां लघुचरितरूपः उपन्यासपाठः **जयन्ति ते सुकृतिनः** इति नाम्ना तथा वाग्गेयकारस्य त्यागराजस्वामिनः कथाद्वारा सङ्गीतस्य माहात्म्यसूचकः विवरणपाठः **रागसुधारस..** इति नाम्ना च समायोजिताः।

प्रवेशकम् - प्रकृतिसंरक्षणात्मकानि महावाक्यानि सञ्चिनोतु।

# पाठः ४

# कनकधारा।



## आमुखम्

अद्वैतचिन्ताप्रतिष्ठापको भवति श्रीशङ्कराचार्यभगवत्पादः। केरलेषु लब्धजन्मनः अस्य चरितं सुविदितमेव। माधवविद्यारण्यस्वामिनः **'शङ्करदिग्विजयम्'** नाम महाकाव्ये श्रीशङ्करस्य सर्वमपि चरितम् उपवर्णितम्। काव्यस्यास्य चतुर्थसर्गात् समाकलितोऽयमंशः।


गुरुकुले वसन् श्रीशङ्करः सतीर्थ्यैः सह भिक्षार्थं प्रतिगृहमटन्नासीत्। स कस्यचित् ब्राह्मणस्य गृहं प्रविवेश। तत्रत्यं दारिद्र्यं विज्ञाय तन्निवृत्तये ऐश्वर्यदेवतां स्तवेनैकेन संस्तुतवान्। **कनकधारास्तवम्** इति प्रख्यातस्य स्तवस्य उत्पत्तेः निदानम् एतदेवेति श्रूयते। स एव पाठस्यास्य सन्दर्भः।।

**स हि जातु गुरोः कुले वसन्**
**सवयोभिः सह भैक्ष्यलिप्सया।**
**भगवान् भवनं द्विजन्मनो**
**धनहीनस्य विवेश कस्यचित्।। १**

### पदच्छेदः

| | | |
|---|---|---|
| स हि | – सः + हि। | (लोपसन्धिः) |
| द्विजन्मनो धनहीनस्य | – द्विजन्मनः + धनहीनस्य। | (विसर्गसन्धिः) |

| अन्वयः | अन्वयार्थः |
|---|---|
| गुरोः कुले | गुरुकुले (तीर्थे) |
| वसन् | वासं कुर्वन् |
| भैक्ष्यलिप्सया | भिक्षाप्राप्तीच्छया |
| सवयोभिः | तुल्यवयस्कैः |
| सह | साकम् |
| जातु | कदाचित् |
| कस्यचित् | कस्यचन |
| धनहीनस्य | निर्धनस्य |
| द्विजन्मनः | ब्राह्मणस्य |
| भवनं | गृहम् |
| विवेश हि | प्राविशत् हि। |



### विग्रहवाक्यानि

| | |
|---|---|
| भैक्ष्यलिप्सया | – भिक्षाणां समूहः भैक्ष्यम् , तस्य लिप्सा, तया। |
| द्विजन्मनः | – द्वे जन्मनी यस्य सः, तस्य। |
| धनहीनस्य | – धनेन हीनः, तस्य। |
| भगवान् | – भगं (ऐश्वर्यादिगुणाः)अस्ति अस्मिन् इति। |
| सवयोभिः | – समानं वयः येषां ते, तैः। |

**भावार्थः**

गुरुकुलवासी ऐश्वर्ययुक्तः सः शङ्करः कदाचित् भिक्षायै सतीर्थ्यैः सह कस्यचन निर्धनस्य ब्राह्मणस्य गृहं प्राप्तवान्।

**तमवोचत तत्र सादरं**
**वटुवर्यं गृहिणः कुटुम्बिनी ।**
**कृतिनो हि भवादृशेषु ये**
**वरिवस्यां प्रतिपादयन्ति ते।। २**

| अन्वयः | अन्वयार्थः |
|---|---|
| तत्र | तदा (तस्मिन् गृहे |
| गृहिणः | गृहनाथस्य |
| कुटुम्बिनी | सहधर्मिणी |
| तं वटुवर्यं | तं ब्रह्मचारिश्रेष्ठम् |
| सादरं | सबहुमानम् |
| अवोचत। | अवदत्। |
| ये | जनाः |
| भवादृशेषु | भवत्सदृशेषु |
| वरिवस्यां | शुश्रूषाम् (पूजाम् इति यावत् ) |
| प्रतिपादयन्ति | अर्पयन्ति |
| ते कृतिनः | ते पुण्यवन्तः |
| हि। | एव। |

**विग्रहवाक्यानि**

वटुवर्यम् – वटुषु वर्यः, तम्।
भवादृशेषु – भवन्तम् इव पश्यति इति भवादृशः, तेषु।
सादरम् – आदरेण सह वर्तते यस्मिन् कर्मणि तद्यथा।

**भावार्थः**

'गृहे ये भवादृशानां ब्रह्मचारिश्रेष्ठानां पूजां कुर्वन्ति ते पुण्यवन्तः एव' इति सा गृहिणी उवाच।

**विधिना खलु वञ्चिता वयं**
**वितरीतुं वटवे न शक्नुमः।**
**अपि भैक्ष्यमकिञ्चनत्वतो**
**धिगिदं जन्म निरर्थकं गतम्।। ३**

**पदच्छेदः**

धिगिदम् - धिक् + इदम्।

**विग्रहवाक्यानि**

अकिञ्चनत्वतः — किञ्चन न विद्यते यस्य सः अकिञ्चनः,
तस्य भावः अकिञ्चनत्वम्, ततः।

| अन्वयः | अन्वयार्थः |
|---|---|
| वयं | इमे जनाः |
| विधिना | दैवतेन |
| वञ्चिताः खलु | प्रतारिताः किल। |
| अकिञ्चनत्वतः | निर्धनत्वात् |
| वटवे | ब्रह्मचारिणे |
| भैक्ष्यं | भिक्षां |
| वितरीतुं | प्रदातुं |
| न शक्नुमः | न पारयामः |
| इदं जन्म | एतत् मर्त्यजन्म |
| निरर्थकं | निष्प्रयोजनम् |
| गतं | जातम्; |
| धिक् | (इति)कष्टम् (निन्दार्थकमव्ययम्)। |

**भावार्थः**

विधिवैपरीत्येन वयं दरिद्राः भवामः। अतः ब्रह्मचारिणे यत्किमपि भैक्ष्यं दातुं न शक्नुमः। अपरेषां कृते प्रयोजनरहितमिदं जन्म निन्दनीयमेव।

**इति दीनमुदीरयन्त्यसौ**
**प्रददावामलकं व्रतीन्दवे।**
**करुणं वचनं निशम्य सोऽ-**
**प्यभवज्ज्ञाननिधिर्दयार्द्रधीः।। ४**



**पदच्छेदः**

दीनमुदीरयन्त्यसौ –
दीनम् + उदीरयन्ती + असौ।
प्रददावामलकम् –
प्रददौ + आमलकम्।
सोऽप्यभवज्ज्ञाननिधिर्दयार्द्रधीः –
सः + अपि + अभवत् +
ज्ञाननिधिः + दयार्द्रधीः।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| इति | एवम् |
| दीनम् | सकरुणम् |
| उदीरयन्ती | वदन्ती |
| असौ | सा(गृहिणी) |
| व्रतीन्दवे | व्रतिचन्द्राय (ब्रह्मचारिश्रेष्ठाय) |
| आमलकं | धात्रीफलम् |
| प्रददौ | अदात्। |

| | |
|---|---|
| ज्ञाननिधिः अपि | पण्डितोऽपि |
| सः | सः वटुः |
| करुणं | दीनम् |
| वचनं | वाक्यम् |
| निशम्य | आकर्ण्य |
| दयार्द्रधीः | करुणार्द्रचित्तः |
| अभवत् । | सञ्जातः । |

### विग्रहवाक्यानि

व्रतीन्दवे – व्रतम् अस्य अस्ति इति व्रती, सः एव इन्दुः, तस्मै।

ज्ञाननिधिः – ज्ञानं निधिः यस्य सः।

दयार्द्रधीः – आर्द्रा धीः यस्य सः आर्द्रधीः, दयया आर्द्रधीः दयार्द्रधीः।

### भावार्थः

एवं सकरुणं वदन्ती सा माता तस्मै ब्रह्मचारिणे आमलकम् एकम् अदात्। स तु लोकम् उदासीनतया पश्यन्नपि तस्याः करुणं वचनमाकर्ण्य दयार्द्रहृदयः अभवत्।

**स मुनिर्मुरभित्कुटुम्बिनीं**
**पदचित्रैर्नवनीतकोमलैः।**
**मधुरैरुपतस्थिवांस्तवै-**
**र्द्विजदारिद्र्यदशानिवृत्तये।। ५**

### पदच्छेदः

स मुनिर्मुरभित्कुटुम्बिनीं – सः + मुनिः + मुरभित्कुटुम्बिनीम्।

पदचित्रैर्नवनीतकोमलैः – पदचित्रैः + नवनीतकोमलैः।

मधुरै.......दशानिवृत्तये – मधुरैः + उपतस्थिवान् + स्तवैः + द्विजदारिद्र्यदशानिवृत्तये ।

| अन्वयः | अन्वयार्थः |
|---|---|
| सः मुनिः | सः वटुः |
| मुरभित्कुटुम्बिनीं | ऐश्वर्यदेवतां (लक्ष्मीम् इति यावत्) |
| नवनीतकोमलैः | नवनीतमिव मृदुलैः |
| पदचित्रैः | मनोहरपदैः |
| मधुरैः | रसयुक्तैः |
| स्तवैः | स्तुतिभिः |
| द्विजदारिद्र्यदशानिवृत्तये | ब्राह्मण-दारिद्र्यावस्थानिवारणाय |
| उपतस्थिवान् | उपासितवान्। |

**विग्रहवाक्यानि**

| | |
|---|---|
| मुरभित्कुटुम्बिनीं | – मुरं (मुरनामकासुरम्)भिनत्ति इति मुरभित् (विष्णुः), तस्य कुटुम्बिनी, ताम्। |
| नवनीतकोमलैः | – नवनीतम् इव कोमलम्, तैः। |
| द्विजदारिद्र्यदशानिवृत्तये | – द्विजस्य दारिद्र्यं द्विजदारिद्र्यं, तस्य दशा, तस्याः निवृत्तिः, तस्यै। |

**भावार्थः**

सः वटुः शङ्करः तेषां दारिद्र्यनिवृत्तये ऐश्वर्यदेवतां मधुरोदारैः वचनैः तुष्टाव।

**अमुना वचनेन तोषिता**
**कमला तद्भवनं समन्ततः।**
**कनकामलकैरपूरय-**
**ज्जनताया हृदयं च विस्मयैः।। ६**

**पदच्छेदः**

कनकामलकैरपूरयज्जनताया हृदयम् –
कनकामलकैः + अपूरयत् + जनतायाः + हृदयम्।

### विग्रहवाक्यानि

| | | |
|---|---|---|
| तद्भवनम् | – | तस्य भवनम्। |
| कनकामलकैः | – | कनकम् एव आमलकम् , कनकामलकम्, तैः । |

| अन्वयः | अन्वयार्थः |
|---|---|
| अमुना | अनेन |
| वचनेन | वाक्येन |
| तोषिता | सन्तुष्टा |
| कमला | लक्ष्मीः |
| तद्भवनं | ब्राह्मणगृहम्। |
| समन्ततः | परितः |
| कनकामलकैः | सुवर्णधात्रीफलैः |
| अपूरयत् | पूरयामास |
| विस्मयैः | अद्भुतैः |
| जनतायाः | जनसमूहस्य |
| हृदयं च । | चित्तं च (अपूरयत्)। |



### भावार्थः

श्रीशङ्करस्य तादृशेन लक्ष्मीस्तवेन (कनकधारास्तवेन) सन्तुष्टा लक्ष्मीदेवी तस्य ब्राह्मणस्य भवनं सुवर्णधात्रीफलैः पूरयामास। तथैव अद्भुतैः तद्देशवासिनां मनांसि च अपूरयत्।

**अमरस्पृहणीयसम्पदं**
**द्विजवर्यस्य निवेशमात्मवान्।**
**स विधाय यथापुरं गुरोः**
**सविधे शास्त्रवराण्यशिक्षत।। ७**

**पदच्छेदः**

| | | |
|---|---|---|
| स विधाय | – | सः विधाय। |
| शास्त्रवराण्यशिक्षत | – | शास्त्रवराणि अशिक्षत। |

**विग्रहवाक्यानि**

| | | |
|---|---|---|
| अमरस्पृहणीयसम्पदं | – | स्पृहयितुं योग्यं स्पृहणीयम्,<br>अमरैः स्पृहणीयम् अमरस्पृहणीयम्,<br>अमरस्पृहणीयं सम्पद् यस्मिन्, तत्। |
| तद्द्विजवर्यस्य | – | तस्य द्विजवर्यस्य। |
| आत्मवान् | – | आत्मा (बुद्धिः) अस्ति अस्मिन् इति । |
| शास्त्रवराणि | – | शास्त्रेषु वरम्, तानि। |

| अन्वयः | अन्वयार्थः |
|---|---|
| आत्मवान् | बुद्धिमान् |
| सः | वटुः |
| द्विजवर्यस्य | ब्राह्मणश्रेष्ठस्य |
| निवेशं | भवनम् |
| अमरस्पृहणीयसम्पदं | देवैरपि विलोभनीयसम्पदं |
| विधाय | कृत्वा |
| यथापुरं | यथापूर्वम् |
| गुरोः | आचार्यस्य |
| सविधे | समक्षम् |
| शास्त्रवराणि | उत्तमशास्त्राणि |
| अशिक्षत। | अध्यैत। |

**भावार्थः**

एवं दरिद्रस्य तस्य ब्राह्मणस्य भवनं स्वर्गीयसुखसम्पन्नं कृत्वा सुमतिः स शङ्करः गुरोर्निकटमागत्य यथापूर्वं तत्समक्षम् उत्तमशास्त्राण्यपठत्।

### धातुपरिचयः

विवेश – विश प्रवेशने इति धातोः परस्मैपदि लिट् प्र.पु.ए.व।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः- | विवेश | विविशतुः | विविशुः |
| मध्यमपुरुषः- | विवेशिथ | विविशथुः | विविश |
| उत्तमपुरुषः- | विवेश | विविशिव | विविशिम। |

## अधिकविस्तरः

### विशेषांशाः

**वसन्** – वस् निवासे इति धातोः शतृप्रत्ययान्तं रूपम्।

वसन् वसन्तौ वसन्तः।

**उदीरयन्ती** – उत् उपसर्गपूर्वक ईर् धातोः शतृप्रत्ययान्तं पदं उदीरयन्। अस्य स्त्रीलिंगरूपं उदीरयन्ती इति।

उदीरयन्ती उदीरयन्त्यौ उदीरयन्त्यः।

**उपतस्थिवान्** - लिङ्र्थे क्वसु प्रत्ययान्तं नामरूपम्। स्था धातोः निष्पन्नः उपतस्थिवस् शब्दः।

उपस्थितवान् उपस्थितवांसौ उपस्थितवांसः।

### व्याकरणविशेषः

धिक् जन्म – धिक् शब्दयोगे द्वितीया स्यात्।

धिगुपर्यादिषु त्रिषु।

द्वितीयाम्रेडितान्तेषु ततोऽन्यत्राऽपि दृश्यते।।

### अलङ्कारः

अमुना वचनेन............ च विस्मयैः।।

अत्र कनकामलकैः तद्भवनम्, अद्भुतैः जनहृदयं च अपूरयत् इति **तुल्ययोगितालङ्कारः।**

तदुक्तम् –

**"वर्ण्यानामितरेषां च धर्मैक्यं तुल्ययोगिता।"**

## वृत्तम्

अत्र सर्वेऽपि श्लोकाः वियोगिनीवृत्ते निबद्धाः। अस्य ललितेति नामान्तरम्। तल्लक्षणम् –

**"विषमे ससजाः गुरुस्समे सभरालोऽथ गुरुर्वियोगिनी इति"।**

सगणः सगणः जगणः गुरुः
U U - U U - U - U -
स हि जा/तु गुरोः / कुले व / सन्

सगणः भगणः रगणः लघुः गुरुः
U U - - U U - U - U -
सवयो/ भिः सह / भैक्ष्यलि/ प्सया।

## पठनप्रवर्तनानि।

**श्लोकान् सतालमालपतु।**

**श्रद्धेयाः अंशाः**

क) वृत्तबोधः।

ख) उच्चारणशुद्धिः।

ग) भावात्मकता।

**वटोः ब्राह्मणकुटुम्बिन्याः च मिथः सम्भाषणं सम्भाव्य लिखतु, कक्ष्यायाम् अवतारयतु।**

**श्रद्धेयाः अंशाः**

क) उचिता सम्भाषणरचना।

ख) स्पष्टतया अवतारणम्।

ग) प्रश्नवाचकानामुचितप्रयोगः।

**' करुणं वचनं निशम्य सोऽप्यभवज्ज्ञाननिधिर्दयार्द्रधीः ' - भवन्तः काव्यांशं पठितवन्तः खलु? आधुनिककाले अस्य काव्यांशस्य प्रसक्तिं संघे चर्चित्वा टिप्पणीं लिखतु ।**

**श्रद्धेयाः अंशाः**

क) चर्चायां भागभागित्वम्।

ख) भाषाशुद्धिः।

ग) आशयपूर्णता।

**आदिशङ्कराचार्यमधिकृत्य रचिताः कृतीः सञ्चिनोतु।**

**श्रद्धेयौ अंशौ**

क) क्रमीकरणचारुता।

ख) विषयवैविध्यम्।

**पाठसम्बन्धिनीं कथां स्ववाक्यैः लिखत।**

**श्रद्धेयौ अंशौ**

क) क्रमीकरणचारुता।

ख) कथाशैली ।

**शङ्कराचार्येण रचिताः केचन ग्रन्थाः**

| **भाष्यम्** | **प्रकरणम्** | **स्तोत्रम्।** |
|---|---|---|
| प्रस्थानत्रयम्<br>(भगवद्गीता,<br>ब्रह्मसूत्रम् ,<br>दशोपनिषत् ) | विवेकचूडामणिः<br>आत्मबोधः<br>उपदेशसाहस्री | भज गोविन्दम्।<br>सौन्दर्यलहरी।<br>कनकधारास्तवम्।<br>शिवानन्दलहरी। |

## चाक्रिकारोहणप्रक्रिया ।

**समाजपरिष्करणे महतां योगदानमधिकृत्य लघुभाषणं करोतु।**

# पाठः ५

# जयन्ति ते सुकृतिनः।




## आमुखम्

"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" इति भगवद्गीतावचनम् अनुवर्तमानाः बहवः महात्मानः इदानीमपि सन्ति। प्राचीनभारते प्रादुर्भूताः दार्शनिकग्रन्थाः प्रायः संस्कृते एवासन्। सर्वदर्शनानां सारसंग्रहभूता भवति **भगवद्गीता** । भगवद्गीतया प्रचोदिताः भवन्ति बालगङ्गाधरतिलकः, महात्मागान्धी, डा. एस्. राधाकृष्णादयः। एते सर्वेऽपि अस्मत्संस्कृतिप्रभावेण देशाभिमानोज्ज्वलितवीर्याः सन्तः स्वतन्त्रभारतनेतॄणां मकुटायमानाः जनमनसि अद्यापि विराजन्ते ।

## बालगङ्गाधरतिलकः।

भारतस्य स्वतन्त्रतासंग्रामे अश्रान्तपरिश्रमं कृतवतां भारतीयानां मनसि "स्वराज्यम् अस्माकं जन्माधिकार एव" इति अवबोधमुत्पादयितुं यतमानः महानुभावः आसीत् बालगङ्गाधरतिलकः। सः भारतीयसंस्कृतिं दर्शनानि च सम्यक् ज्ञातवान्। अतः यदा यदा सः कारागृहे बद्धः आसीत् तदा तदा संस्कारसम्बन्धिनीः नूतनकृतीः संरचयन् सक्रियः एव अवर्तत। जनानुद्बोधयितुं सः स्वपत्रिकादिभिः स्वाशयान् प्रचारयामास। अपि च असङ्घटितान् जनान् योजयितुं भारतीयाचारानुसारं देशीयोत्सवादीन् आयोजयच्च । इदंप्रथमतया वेदानां कालनिर्णयं कर्तुं सः प्रयत्नमकरोत्। प्राचीनभारतीयसंस्कृतग्रन्थैः अतीवाकृष्टः सः तेभ्यः ऊर्जं समार्जयन् भारतीयानामुन्नमनाय बहुधा यत्नमकरोच्च।








### गीतारहस्यम्

बालगङ्गाधरतिलकः भारतीयानां स्वतन्त्रताभिवाञ्छां प्रोज्वालयितुम् उपनिषत्सारभूतानां भगवद्गीतातत्त्वानां व्याख्यां कालानुसारं कृत्वा जनानुद्बोधयामास। तत् **गीतारहस्यम्** इति महितनाम्ना श्लाघ्यते।

**महात्मागान्धी।**



अस्माकं राष्ट्रपिता महात्मागान्धी भारतीयदर्शनैः प्रभावित आसीत्। औपचारिकरीत्या सः संस्कृतं न अपठत्। तथापि गीतातत्त्वे नितरामाकृष्टः सः श्रीरामं पतितपावनं मर्यादापुरुषोत्तमं च अमन्यत। गान्धिमहाभागस्य रामराज्यसङ्कल्पः प्रसिद्ध एव। '**सत्यशोधनम्**' नाम आत्मकथात्मके ग्रन्थे सः तस्य भगवद्गीताश्रितत्वं दृढं करोति। गीताश्लोकानाम् अनुसन्धानेन झटित्येव सर्वदुःखशमनं भवेदिति स वदति। 'संस्कृतपठनात् ऋते कश्चन यथार्थभारतीयो न भवेत्' इत्यपि तेन परामृष्टम्। एवं संस्कृतभाषायां परिचिताः कृपा-दया-अहिंसादिप्रघोषकाः तत्त्वचिन्ताः महात्मनः अस्य कर्ममण्डले बहूपकारिकाः आसन् इति अवगन्तुं शक्यते ।




**सत्यशोधनसारांशः**

यदा सन्देहाः माम् आखेटयन्ति, प्रत्याशायाः किरणं न पश्यामि, तदा अहं भगवद्गीतामाश्रये। ये गीताम् अनुध्यायन्ते ते प्रतिदिनं नवनवानुभूतीः अनुभवन्ति, नवीनार्थप्रकाशं च लभन्ते।।

## डा. एस् .राधाकृष्णः।

भारतस्य प्रथमः उपराष्ट्रपतिः डा. सर्वेप्पल्लि राधाकृष्णन् महाभागः भारतीयदर्शनेषु अतीव तत्परः आसीत्। स बाल्य एव स्वपरिवारात् साम्प्रदायिकशिक्षाम् अवाप्तवान्। तस्य औपचारिकशिक्षा क्रैस्तवसभाविद्यालयकलालयादिषु आसीत्। अतः पाश्चात्यतत्त्वचिन्ताम् अधिकृत्य तस्य अवगाढं ज्ञानम् अवर्तत। आधुनिककाले भारतीयदर्शनानां व्याख्यानं कृत्वा प्रसिद्धिं प्राप्तेषु दार्शनिकेषु अन्यतमः सः, तेषाम् दर्शनानां महत्वं सर्वत्र उद्घोषितवान्। यद्यपि अनेके पठनाय पाश्चात्यदेशम् अगच्छन् तथापि राधाकृष्णमहाभागः ओक्स्फोर्ड् सर्वकलाशालायाम् इदं प्रथमतया पाठनाय एव अगच्छत्। प्राचीनभारतीयदर्शनानि यथासन्दर्भम् उचितरूपेण व्याख्यातुं समर्थः आसीदयं महानुभावः। विंशतितमे वयसि अनेन रचितः **वेदान्तस्य धार्मिकता** इति प्रथमग्रन्थः प्रसिद्धीकृतः। एवं संस्कृतेन प्रभावितः सः भारतीयदर्शनानां सारवत्तां लोकेषु सर्वत्र प्रसारितवान्।



| | | |
|---|---|---|
| नाम | - | डा. सर्वेप्पल्ली राधाकृष्णः |
| जन्म | - | १८८८ सेप्तम्बर् ५ तिरुत्तणि,तमिल्नाडु। |
| पितरौ | - | एस्. वीरस्वामी, सीतम्मा। |
| प्रशस्तिः | - | भारतस्य राष्ट्रपतिः। दार्शनिकः । |
| मृत्युः | - | १९७५ एप्रिल् १७ |

### जेट् नामक पाश्चात्येन इत्थं सूचितम्।

अद्य राधाकृष्णेन यत्कृतं तदतुल्यमेव। तथा सः प्रबन्धकत्वेन कार्याण्यपि अकरोत्। अत्र राधाकृष्णः भारतीयप्राचीनदर्शनां महत्वेन साकम् इदानीन्तनस्य पाश्चात्यविज्ञानस्य ऊर्जस्वलतामपि संयोज्य सेतुं निर्मातुं प्रयतते- इति।

| | | |
|---|---|---|
| जनामाधिकार एवेति | - | जन्माधिकारः + एव + इति। |
| तथाऽपि | - | तथा + अपि । |
| झटित्येव | - | झटिति + एव । |
| बाल्य एव | - | बाल्ये + एव। |
| आसीदयम् | - | आसीत् + अयम्। |

**विग्रहः**

| | | |
|---|---|---|
| दर्शनम् | - | दृश्यते अनेन इति दर्शनम्। |
| पुरुषोत्तमः | - | पुरुषेषु उत्तमः पुरुषोत्तमः। |
| राष्ट्रपिता | - | राष्ट्रस्य पिता राष्ट्रपिता। |
| राष्ट्रपतिः | - | राष्ट्रस्य पतिः राष्ट्रपतिः। |
| सत्यशोधनम् | - | सत्यस्य शोधनम् ,सत्यशोधनम्। |

**धातुपरिचयः**

| | | |
|---|---|---|
| प्रचारयामास | - | प्र + चर गतौ णिचि लिट् परस्मैपदी प्र . पु . ए . व । |
| भवेत् | - | भू सत्तायां विधिलिङ् परस्मैपदी प्र . पु . ए . व । |
| शक्यते | - | शक मर्षणे कर्मणि लट् आत्मनेपदी प्र . पु . ए . व । |

**व्याकरणविशेषः**

संस्कृतपठनात् **ऋते** कश्चन यथार्थभारतीयो भवितुं नार्हति।

(ऋते योगे पञ्चमी स्यात्)

## पठनप्रवर्तनानि।

**पाठभागं सम्यक् पठित्वा प्रश्नोत्तरकेलिं चालयतु।**

**श्रद्धेयाः अंशाः**

प्रश्नवाचकशब्दानां सम्यगुपयोगः।

आशयपूर्णता।

भाषाशुद्धिः।

सर्वेषां सहभागित्वम्।

**केरलीयसमाजपरिष्कर्तॄन् अधिकृत्य चर्चां प्रचालयतु। ततः टिप्पणीं लिखित्वा अवतारयतु।**

**श्रद्धेयाः अंशाः**

समाजपरिष्कर्तॄणां नामसमाहरणम्।

जीवनचरितसम्पादनम्।

टिप्पणीलेखनम्।

भाषाशुद्धिः।

**पाठभागे मञ्जूषायां दत्तांशान् स्वीकृत्य तत्रस्थानां महात्मनां जीवनमधिकृत्य लघुटिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः**

दत्तांशानां वाचनम्।

आशयपूर्णता।

भाषाशुद्धिः।

जीवनचरितघटना।

**महात्मनां सूक्तीः समाहृत्य कक्षायाम् अवतारयतु।**

**श्रद्धेयौ अंशौ**

सम्पुटीकरणम् ।

विषयानुसारं वर्गीकरणम्।

**महात्मागान्धिनः, बालगङ्गाधरतिलकस्य ,एस् .राधाकृष्णस्य च प्रसिद्धानां ग्रन्थानां पट्टिकां करोतु, सम्पुटं च रचयतु।**

**श्रद्धेयाः अंशाः**

औचित्यम्।

पूर्णता।

आकर्षणीयता।

## चाक्रिकारोहणप्रक्रिया ।

**देशभक्तिपराणि गीतकानि सतालमालपतु।**

# पाठः ६

# रागसुधारस.....।



## आमुखम्

सर्वेषां प्राणिनां हृदयावर्जकसमर्थं भवति सङ्गीतमिति सुविदितमेव। प्रोक्तं च अभियुक्तैः ***शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गानरसं फणी***- इति। भारतीयासु चतुष्षष्टिकलासु सङ्गीतस्य प्रथमस्थानं वर्तते। गान्धर्वविद्या इति नामान्तरेण प्रसिद्धायाः संगीतविद्यायाः उपासकाः बहवः सन्ति। तेषु अन्यतमः अर्वाचीनश्चास्ति त्यागराजस्वामी। कर्णाटकसङ्गीतलोके कनिष्ठिकाधिष्ठितं स्थानम् अलङ्करोत्ययं महात्मा। सङ्गीतज्ञं त्यागराजमधिकृत्य बहूनि ऐतिह्यानि प्रथितानि। तेषु प्रसिद्धमेकम् अत्र प्रस्तूयते।

**सामजवरगमन..!**
**साधुहृद्सारसाब्जपाल..!**
**कालातीतविख्यात..!!**


तञ्चावूर्देशस्थः कश्चित् देवालयः। आस्वादकहृदयेषु अपूर्वामनिर्वचनीयामनुभूतिं प्रवर्द्धयन् कश्चन सङ्गीतज्ञः तत्र कीर्तनमालपति स्म। स कृशगात्रोऽपि प्रतिपच्चन्द्र इव तेजस्वी आसीत्। तस्य मुखारविन्दात् निर्गलितासु संगीतामृतधारासु निमग्नाः तत्रस्थाः आश्चर्यभरिताः अभवन्।

"अहो कीदृशी स्वरमाधुरी?"

"कोऽयं गायकः?"

"केयं कृतिः?" तमजानन्तः केचित् परस्परमपृच्छन्।

"श्रुतिरागविशारदः त्यागराजोऽयं महात्मा। तिरुवय्यार्देशे उषित्वा स बहूनि कीर्त्तनानि व्यरचयत्। तेषां रागतालसंविधानं च सामञ्जस्येन तेनैव कृतम्। तेष्वन्यतमा हिन्दोलरागनिबद्धा संस्कृतकृतिरेवात्रालपिता।" तं सङ्गीतज्ञं ज्ञातवन्तः अपरे प्रत्यवदन्।



कालान्तरे त्यागराजस्वामिनः कीर्तिः सर्वत्र प्रसारिता। बहवः संङ्गीतप्रणयिनः नादोपासकस्यास्य शिष्यत्वं स्वीकृतवन्तः। तञ्चावूर्देशाधिपः शरभोजी च तस्य महत्वं कर्णाकर्णिकया अशृणोत्। स त्यागराजस्य मैत्रीमैच्छत्। विज्ञानसम्पन्नोऽपि त्यागराजः निर्धनत्वादतीव क्लेशमनुभवति स्म। स उञ्छवृत्तिं कृत्वा जीवितं निनाय। वृत्तान्तममुं शरभोजी अजानात्। अतः त्यागराजं दारिद्र्याद्दुद्धर्तुं राजा उपायमेकं स्वीचकार। त्यागराजः राजप्रशस्तिपरां कृतिमेकां विरच्य समर्पयति चेत् प्रभूतं धनं तस्मै प्रदातुं राजा निश्चिकाय। दूतेनैकेन तदिङ्गितं तस्मै न्यवेदयच्च।

राजनिर्देशं शृण्वतः त्यागराजस्य हृदयान्तरालात् कृतिरेका



निर्गलिता। ‘निधिचालसुखमा.... !!’ स सर्वं विस्मृत्य कल्याणिरागेण अगायत्।

**‘धनार्जनम् उत ईश्वरभजनं वा करणीयम्।**
**नरस्तव उत हरिस्तवो वा वरणीयः।**
**रे मानस! सत्यं वद रमणीयम्..।।’**

इत्यर्थोपेतं तत् तेलुगुभाषानिबद्धं कीर्तनं स राज्ञे प्रेषितवान्। ईश्वरसेवनमेव सर्वस्मात्परं धनमिति त्यागराजवचनं श्रुत्वा राजा लज्जानम्रमुखो बभूव।।

कदाचित् षट्कालगोविन्दमारार् इति प्रख्यातः केरलीयसंङ्गीतज्ञः त्यागराजं द्रष्टुं तमभ्यगच्छत्। षट्कालेषु गातुं गोविन्दमारार्महाभागस्य वैभवं पुरतो दृष्ट्वा स विस्मितस्तिमितोऽभूत् । स तदैव “एन्तरो महानुभावुलु... ” इति श्रीरागविशिष्टेन कीर्तनेन तमभ्यर्चयत्। त्यागराजपञ्चरत्नकीर्तनेषु कीर्तनमिदं पश्चात् नितरां प्रसिद्धिमवाप।।

**श्रुतिः।**

श्रूयते अनेन इति श्रुतिः। गायकः यन्नादविशेषमाधारीकृत्य स्वगानप्रयोगमाचरति तच्छ्रुतिरिति सामान्येन उच्यते। श्रवणसुखप्रदेषु नादेषु अधिकसुखदायकाः श्रुतयः।

**रागः।**

रञ्जयति सहृदयानां मनांसि इति रागः। श्रुति - ताल -साहित्यान्यपेक्ष्य अधिकमनोज्ञकत्वात् रागः इति विशेषसंज्ञा।

**कृतिः।**

यत्र साहित्यमपेक्ष्य संगीतस्य अधिकप्राधान्यं, तथा ईश्वर- सज्जनादीनां स्तुतिपरं तत्त्वचिन्तापरं च भवति तत्र सा कृतिरित्युच्यते। रीतिरियं त्यागराजेनोद्घाटिता।

**कीर्तनम् ।**

यस्मिन् सङ्गीतविभागे गेयांशमपेक्ष्य साहित्यस्य प्राधान्यमस्ति तत् कीर्तनम् । अत्र भक्तिरेव अङ्गी। ईश्वराराधनमेव मुख्योद्देश्यम्।

## पदार्थः

| | | |
|---|---|---|
| सामजः | - | गजः |
| सारसं | - | सरसिभवम् |
| अनुभूतिः | - | अनुभवः |
| निमग्नः | - | नितरां मग्नः (सुस्नातः इति यावत्) |
| विशारदः | - | समर्थः |
| सामञ्जस्येन | - | औचित्यपूर्णेन |
| प्रभूतम् | - | बहुलम् (अनेकम्) |
| इङ्गितम् | - | मनोभावः |
| स्तिमितः | - | अचञ्चलः /आर्द्रः। |

## पदच्छेदः

| | | |
|---|---|---|
| कृशगात्रोऽपि | = | कृशगात्रः +अपि |
| प्रतिपच्चन्द्र इव | = | प्रतिपच्चन्द्रः +इव |
| केयं | = | का + इयम् |
| तेनैव | = | तेन +एव |
| तेष्वन्यतमः | = | तेषु +अन्यतमः |
| संस्कृतकृतिरेवात्रालपिता | = | संस्कृतकृतिः +एव +अत्र +आलपिता |
| नादोपासकस्यास्य | = | नादोपासकस्य +अस्य |
| विज्ञानसम्पन्नोऽपि | = | विज्ञासम्पन्नः +अपि |
| दारिद्र्यादुद्धर्तुं | = | दारिद्र्याद् + उद्धर्तुम् |
| न्यवेदयच्च | = | न्यवेदयत् + च । |

## पठनप्रवर्तनानि।

**संगीतज्ञेन सह साक्षात्कारं कृत्वा लघुटिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः**

**क)** प्रश्नवाचकानामुचितप्रयोगः। **ख)** विषयानुबन्धिता।

**ग)** भाषाशुद्धिः।

**वाग्गेयकारानधिकृत्य लघुटिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः**

**क)** भाषाशुद्धिः। **ख)** विषयानुबन्धिता। **ग)** समग्रता।

**पाठभागात् सङ्गीतग्रन्थेभ्यश्च प्रसिद्धानां कर्णाटकसङ्गीतरागाणां नामानि चित्वा पट्टिकां रचयतु।**

**श्रद्धेयाः अंशाः**

**क)** अकारादिक्रमः। **ख)** सञ्जयनसामर्थ्यम् ।

**ग)** पट्टिकाकरणसामर्थ्यम् ।

**त्यागराजस्वामिनः कलाजीवितस्य इदानीन्तनकलाकाराणां कलाजीवितस्य च तुलनं कृत्वा चर्चां कुर्वन्तु।**

**श्रद्धेयाः अंशाः**

**क)** चयनसामर्थ्यम् । **ख)** निरीक्षणपाटवम्। **ग)** चर्चायां भागभागित्वाम्।

### अधिकविस्तरः

**उञ्छवृत्तिः -जीवनोपायविशेषः**

(शिलाहरणम् इति च कथ्यते)

अबाधितस्थानेषु पथि वा क्षेत्रेषु वा यत्र यत्र ओषधयो धान्यानि वा लवनानन्तरमवशिष्यन्ते तानि अङ्गुलीभ्याम् एकैकं कणम् इति क्रमेण सावधानं सञ्चित्य यः उपजीवनं करोति सः एव शिलाहारी। तत्प्रवृत्तिरेव उञ्छवृत्तिः।।

**तालः।**

गीतं नृत्तं च वाद्यञ्च तौर्यत्रिकमिति स्मृतम्।
तौर्यत्रिकस्तु मत्तेभस्तालस्तस्याङ्कुशो मतिः।

तौर्यत्रिकस्यावतारणे यः समयक्रमः आचर्यते स एव तालः। गीतवाद्यनृत्तानाम् अवतारणवेगतायाः नियन्त्रणमेव तालस्योद्देश्यम्।

**वाग्गेयकारः।**

वाङ्मातुरुच्यते गेयं धातुरित्यभिधीयते।
वाचं गेयं च कुरुते यः स वाग्गेयकारकः।। (सङ्गीतरत्नाकरः)

गीतस्य वाङ्मयरूपं मातुः इति व्यवह्रियते। गेयं रूपं धातुः इति च। ते वाग्गेये यः औचित्यपूर्वं रचयति स एव वाग्गेयकारः। गानकर्ता इति सामान्योऽर्थः।

बहवः संङ्गीतशास्त्रग्रन्थाः सन्ति। तेषु केषाञ्चन प्रसिद्धग्रन्थानां ग्रन्थकर्तॄणां च नामानि अधो दीयन्ते।

| | | | |
|---|---|---|---|
| संस्कृतग्रन्थाः | सङ्गीतमकरन्दम् | - | नारदः |
| | सङ्गीतरत्नाकरः | - | शार्ङ्गदेवः |
| | सङ्ग्रहचूडामणिः | - | गोविन्दाचार्यः |
| | चतुर्दण्डीप्रकाशिका | - | वेङ्कटमखि |
| | सङ्गीतपारिजातः | - | अहोबलः |
| कैरलीग्रन्थः | सङ्गीतचन्द्रिका | - | आट्टूर् कृष्णपिषारोटि । |

## अभ्यासपत्रिका-२

**1) *सन्धिकार्यं कुरुत।***

| | |
|---|---|
| तेनैव | तेन + एव। |
| अनेनैव | .............। |
| नैकोऽपि | .............। |
| पाठस्यास्य | .............। |
| केयम् | ............। |
| एवेति | ............। |
| इत्यतः | ............। |

2) ***विग्रहकार्यं कुरुत।***

| | |
|---|---|
| राष्ट्रपिता | राष्ट्रस्य पिता। |
| सत्यशोधनम् | ................. |
| धनहीनस्य | ................. |
| कालान्तरे | ................. |
| मैत्री | ................ |
| ज्ञाननिधिः | ................ |

3) ***सम्भाषणांशं पूरयत।***

श्रीहरिः – भो! सुनिल! भवान् कुतः आगच्छति?

सुनिलः – ..........................................।

श्रीहरिः – ततः किं पुस्तकं भवान् स्वीकृतवान्?

सुनिलः – ..........................................।

श्रीहरिः – सत्यशोधनं नाम ग्रन्थः समीचीनः एव। अहं तं पूर्णं पठितवान्।

सुनिलः – त्वदधीने गीतारहस्यं नाम ग्रन्थः अस्ति वा?

श्रीहरिः –.............। .................................?

सुनिलः – न जानाति भवान्? बालगंगाधरतिलकः एव।

श्रीहरिः – अस्तु, मिलामः। धन्यवादः।

सुनिलः – अस्तु, धन्यवादः।

## शब्दकोशः

| संस्कृतम् | संस्कृतम् | कैरली | आङ्गलेयम् | कन्नटम् |
|---|---|---|---|---|
| अनिर्वचनीयः | वर्णयितुम् अशक्यः | വർണനാതീതം | inexplicable | ಹಾದುವಬಣ್ಣ |
| अवबोधः | ज्ञानम् | അറിവ് | Knowledge | ಜ್ಞಾನ |
| उञ्छवृत्तिः | शिलाहरणं नाम उपजीवनवृत्तिः | ഉതിർമണികൾ പെറുക്കിയെടുത്തുള്ള ഉപജീവനം | Living up on forbidden grains | ಉಞ್ಛವೃತ್ತಿ |
| उषित्वा | वासं कृत्वा | താമസിച്ചിട്ട് | Having resided | ವಾಸವಾಗಿ |
| कृशगात्रः | कृशतनुः | മെലിഞ്ഞ ശരീരമുള്ളവൻ | Slimmish | ತುಂಬಾ ಕ್ಷೀಣ |
| नवनीतम् | हैयङ्गवीनम् | വെണ്ണ | Fresh Butter | ಬೆಣ್ಣೆ |
| निर्गलितम् | प्रसृतम् | ഒഴുകിയത് | Flown out | ತುಂಬಿತುಳುಕು |
| प्रख्यातः | प्रसिद्धः | പ്രസിദ്ധൻ | Famous | ಪ್ರಸಿದ್ಧ |
| भैक्ष्यलिप्सा | भिक्षालाभेच्छा | ഭിക്ഷ ലഭിക്കണമെന്ന ആഗ്രഹം | Wish to get alm | ಭಿಕ್ಷೆ ಸಿಗಬಹುದೆಂಬ ಇಚ್ಛೆ |
| मुरभित्कुटुम्बिनी | ऐश्वर्यदेवता | ലക്ഷ്മീദേവി | Godess Lakshmi | ಲಕ್ಷ್ಮೀದೇವಿ |
| लज्जावनम्रः | लज्जावनतः | ലജ്ജയാൽ കുനിഞ്ഞവൻ | Bowed with shame | ಅವಮಾನದಿಂದ ಬಾಗು |
| लब्धजन्मा | जातः | ജനിച്ചവൻ | One who was born | ಜನಿಸಿದವನು |
| विशारदः | समर्थः | സമർഥൻ | Capable | ಸಮರ್ಥ |
| वैभवम् | प्रागल्भ्यम् | സാമർഥ്യം | Skill | ಸಾಮರ್ಥ್ಯ |
| सतीर्थ्यः | सहपाठी | സഹപാഠി | Classmate | ಸಹಪಾಠಿ |

# किमधिगतम् ?

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम-संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

# एककम् ३

# साहिती

## आमुखम्।

काव्यनाटकादिभिः साहित्यकृतिभिः सुसम्पन्ना भवति संस्कृतभाषा। पञ्चमहाकाव्यानि प्रसिद्धानि खलु। तद्वत् महाकवेः कालिदासस्य अभिज्ञानशाकुन्तलाख्यं नाटकं विश्वप्रसिद्धं भवति। सर्वाण्येतानि महाकवीनां साहितीसपर्यायाः फलानि भवन्ति।

साहितीनामके अस्मिन्नेकके पञ्चमहाकाव्येभ्यः एकैकं श्लोकमुद्धृत्य **काव्यमुक्तावलि**रिति पाठः अभिज्ञानशाकुन्तलात् शकुन्तलायाः पतिगृहगमनसन्दर्भसम्बन्धी **शिवास्ते सन्तु पन्थानः** इति पाठश्च आयोजितौ।

**प्रवेशकम्** - ***समाजे स्त्रीणां स्थानम्***- **इति विषये संगोष्ठीं प्रचालयतु।**

# पाठः ७

# काव्यमुक्तावलिः।

कुमारसम्भवम् , रघुवंशम् , किरातार्जुनीयम् , शिशुपालवधम् , नैषधीयचरितम् इत्येतानि भवन्ति पञ्चमहाकाव्यानि। एषु सौन्दर्यस्य तथा शक्तेः च प्रतिरूपेणैव महाकविभिर्महिलाः वर्णिताः। तासामेकैकमुदाहरणमत्र पश्यन्तु।



## कुमारसम्भवम्।

महाकविः कालिदासः कविकुलगुरुरिति विख्यातः भवति। अनेन त्रीणि नाटकानि द्वे महाकाव्ये द्वे खण्डकाव्ये च विरचितानि। अस्य महाकाव्ययोरन्यतरं भवति कुमारसम्भवम्। काव्येऽस्मिन् पार्वतीपरमेश्वरयोः विवाहपर्यन्ता कथा एव कालिदासेनोपवर्णिता इति श्रूयते।

कुमारसम्भवे षष्ठसर्गे गौरीं परिणेतुमिच्छोः शम्भोः दौत्येन सप्तर्षयः हिमवन्तं प्रापुः। तेषु अङ्गिरः गिरिशस्य कृते गिरिजां गिरीशं ययाचे। तस्मिन् समये पितुरन्तिके स्थितायाः पार्वत्याः अवस्था कविना एवं वर्णिता।

**एवं वादिनि देवर्षौ**
**पार्श्वे पितुरधोमुखी।**
**लीलाकमलपत्राणि**
**गणयामास पार्वती।।** (कुमारसम्भवम् – 6/84)

**पदच्छेदः**

पितुरधोमुखी – पितुः + अधोमुखी।



| अन्वयः | अन्वयार्थः |
|---|---|
| देवर्षौ | अङ्गिरसि। |
| एवं वादिनि | एवम् उक्तवति सति। |
| पार्वती | उमा । |
| पितुः | तातस्य(हिमवतः)। |
| पार्श्वे | समीपे। |
| अधोमुखी | लज्जया अवनतमुखी(सती) |
| लीलाकमलपत्राणि | क्रीडाकमलदलानि। |
| गणयामास। | अगणयत् । |

**विग्रहवाक्यानि**

अधोमुखी-अधः मुखं यस्याः सा ।

देवर्षौ - देवः च असौ ऋषिः च। तस्मिन् ।

पार्वती - पर्वतस्य अपत्यं स्त्री।

लीलाकमलपत्राणि - लीलायै कमलं लीलाकमलं, तस्य पत्राणि ।

**आशयः**

हिमवता साकं देवर्षिभिः कृतां स्वविवाहचर्चां श्रोतुमुत्सुका भूत्वा पार्वती पितुः पार्श्वे लज्जावनम्रमुखी सती कमलदलगणनाव्याजेन स्थिता।

**वृत्तम्** - **अनुष्टुप्।**

**कोशः**

**पिता** - तातस्तु जनकः पिता।

**पार्वती** - अद्रिजा महादेवी शर्वाणी पार्वती शिवा।

**द्विकर्मकप्रयोगः**

गिरिशाय गिरिजां गिरीशं ययाचे।

प्रधानकर्म - गिरिजाम् , अप्रधानकर्म -गिरीशम् ।

## रघुवंशम्।

सूर्यवंशप्रसूतेः दिलीपादारभ्य अग्निवर्णपर्यन्तानां रघूणामन्वयः एव रघुवंशस्य प्रमेयः। अस्य चतुर्दशे सर्गे सीतापरित्याग एव कथावस्तु। रावणनिग्रहानन्तरम् अयोध्यां प्रत्यागतः सीतासमेतः राज्ये अभिषिक्तः रामः अन्तर्वत्नीं तां लोकापवादभिया परित्यक्तुं निश्चिकाय। तन्निर्वहणार्थं लक्ष्मणमादिदेश च। तथा तां वाल्मीकेरुटजोपान्तं नीत्वा भ्रातुराज्ञां निरुह्य यातुकामं सौमित्रिं सीता एवं वदति।



**वाच्यस्त्वया मद्वचनात् स राजा**
**वह्नौ विशुद्धामपि यत्समक्षम्।**
**मां लोकवादश्रवणादहासीः**
**श्रुतस्य किं तत्सदृशं कुलस्य?।।** (रघुवंशम् –14/61)

**पदच्छेदः**

| | |
|---|---|
| वाच्यस्त्वया | - वाच्यः + त्वया। |
| स राजा | - सः + राजा। |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| सः राजा | सः नृपतिः। (रामः इत्याशयः)। |
| मद्वचनात् | मम वचनेन। |
| त्वया | भवता (लक्ष्मणेन)। |
| वाच्यः | वक्तव्यः। |
| समक्षम् | अक्ष्णोः समीपं (प्रत्यक्षं) |
| वह्नौ | अग्नौ |
| विशुद्धाम् अपि | परिशुद्धाम् अपि |
| माम् | आत्मानम् (सीताम्) |
| लोकवादश्रवणाद् | जनापवादश्रवणात् |
| यत् | यस्मात् |
| अहासीः। | (त्वम्) परित्यजसि स्म। |
| तत् | तत् |
| श्रुतस्य | विख्यातस्य (आर्जितविज्ञानस्य) |
| कुलस्य | वंशस्य (च) |
| सदृशम् | उचितम्। |
| किम्? | वा? |

**विग्रहवाक्यानि**

| | |
|---|---|
| समक्षम् | - अक्ष्णोः समीपम्। |
| राजा | - राजते (शोभते) इति। |
| लोकवादश्रवणाद् | - लोकानां वादः लोकवादः, तस्य श्रवणं लोकवादश्रवणं, तस्मात्। |

**आशयः**

रामस्य पुरत एव अग्निपरीक्षया आत्मनः परिशुद्धिं स्थापितवतीं सीतां केवलापवादभयेन रामः परित्यक्तवान्। एतत् तस्य धर्मबोधस्य विख्यातस्य कुलस्य च युज्यते वा इति स राजा त्वया प्रष्टव्यः इति सीता लक्ष्मणं वदति।

**वृत्तम्**

**उपजातिः।**

इन्द्रवज्रोपेन्द्रवज्रयोः सङ्करः उपजातिः। तल्लक्षणं यथा–

" अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः" ।

**कोशः**

| | | |
|---|---|---|
| यत् | - | यत्-तत्-यतः-ततो हेतौ। |
| कुलम् | - | वंशः सन्तानो जननं कुलम्। |
| किम् | - | किं कुत्सायां वितर्के च निषेधप्रश्नयोरपि। |
| सदृशम् | - | सदृशं समे उचिते च। |
| समक्षम् | - | प्रत्यक्षं तु समक्षवत्। |
| वह्निः | - | अग्निर्वैश्वानरो वह्निः। |

**व्याकरणांशः**

अहासीः– ओहाक् त्यागे। परस्मैपदी - लुङ्- म.पु.ए.व।

स राजा त्वया वाच्यः। - कर्मणि प्रयोगः।

## किरातार्जुनीयम्।

पञ्चमहाकाव्येषु अर्थगौरवेण सविशेषं स्थानमावहति भारवेः किरातार्जुनीयम्। ' उपमा कालिदासस्य भारवेरर्थगौरवम् ' इति या प्रथा सा किरातार्जुनीयस्य गौरवं नितरां व्यनक्ति। काव्येऽस्मिन् अष्टादशसर्गाः विद्यन्ते। तत्र प्रथमसर्गे द्यूतक्रीडायां कौरवैरभिभूताः पाण्डवाः समयपालनाय वनं प्रविष्टाः इति वर्णितम्। गच्छता कालेनापि राज्यलाभाय युधिष्ठिरः किमपि न करोतीत्यतः पाञ्चाली तमेवं वदति।


**इमामहं वेद न तावकीं धियं**
**विचित्ररूपा खलु चित्तवृत्तयः।**
**विचिन्तयन्त्या भवदापदं परां**
**रुजन्ति चेतः प्रसभं ममाधयः।।** (किरातार्जुनीयम् – 1/37)

**पदच्छेदः**

ममाधयः - मम + आधयः।

विचित्ररूपा खलु - विचित्ररूपाः + खलु।
विचिन्तयन्त्या भवदापदम् - विचिन्तयन्त्याः + भवदापदम्।

| अन्वयः | अन्वयार्थः |
|---|---|
| इमाम् | ईदृशीम् |
| तावकीम् | त्वत्सम्बन्धिनीम् |
| धियम् | बुद्धिम् |
| अहं न वेद । | अहं न जानामि |
| चित्तवृत्तयः | (नराणाम्) मनोव्यापाराः |
| विचित्ररूपाः खलु। | निर्णेतुमशक्याः खलु। |
| पराम् | अतितीव्राम् |
| भवदापदम् | तव (युधिष्ठिरस्य) विपदम् |
| विचिन्तयन्त्याः | विशेषेण स्मरन्त्याः |
| मम | मे (द्रौपद्याः) |
| चेतः | चित्तं। |
| आधयः | मनस्तापाः |
| प्रसभम् | बलात्कारेण |
| रुजन्ति । | व्यथयन्ति। |



**विग्रहवाक्यानि**

चित्तवृत्तयः - चित्तस्य वृत्तयः।
तावकीम् - तव इदम् तावकम्। (त्वत्सम्बन्धिनीं) तव इमां तावकीम्।
विचित्ररूपाः - विचित्रं रूपं यासां ताः।

**आशयः**

दुर्योधनादिभिः कौरवैः पराजितोऽपि युधिष्ठिरः प्रतीकाराय न प्रवर्तते। तस्य चित्तवृत्तिं सा न जानाति। यतः प्रत्येकं मानवस्य मनोगतयः भिन्नाः इति। तथापि पाण्डवानां व्यसनं चिन्तयन्त्याः द्रौपद्याः मनः आधयः अतितरां तापयन्ति।

**वृत्तम्- वंशस्थम्।**

तल्लक्षणम् यथा- जतौ तु वंशस्थमुदीरितं जरौ।

**प्रयोगविशेषः**

खलु - अवधारणार्थकमव्ययम्।

खलु स्याद्वाक्यभूषायां जिज्ञासायां च सान्त्वने। इति।

विद्लृ ज्ञाने - प. प - लट्

वेत्ति वित्तः विदन्ति ।

**विदो लटो वा** इति सूत्रेण णलादीनाम् आदेशः। तदा –

वेद विदतुः विदुः । इति च रूपाणि।

**कोशः**

**आपद्** – विपत्तिर्विपदापदौ।

**चेतः** – चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः।

**धीः** – बुद्धिर्मनीषा धिषणा धीःप्रज्ञा शेमुषी मतिः।

**प्रसभं** – प्रसभं तु बलात्कारो हठः।

## शिशुपालवधम्।

काव्याङ्गभूतैः अलङ्कारैरर्थगौरवेण पदलालित्येन च व्यतिरिच्य विलसति माघस्य **शिशुपालवधम्।** माघविरचितत्वादस्य माघमिति नामान्तरमप्यस्ति। चेदिराजस्य शिशुपालस्य द्वारकाधीशस्य श्रीकृष्णस्य च मिथः संवृत्तः सङ्ग्रामः अन्ते शिशुपालस्य वधश्चास्य प्रमेयः। काव्येऽस्मिन् विंशतिस्सर्गास्सन्ति। अस्य पञ्चदशे सर्गे श्रीकृष्णमभियोद्धुं प्रस्थितेभ्यः शिशुपालभटेभ्यस्तेषां नारीभिः कृता यात्रानुमतिः वर्णिता। प्रसङ्गेऽस्मिन् नारीणां निर्भयता मनःस्थैर्यं च नितरां प्रकाश्यते।

**न मुमोच लोचनजलानि**
**दयितजयमङ्गलैषिणी।**
**यातमवनिमवसन्नभुजा-**
**न्न गलद्विवेद वलयं विलासिनी।।** (शिशुपालवधम्–15/85)

**पदच्छेदः**

अवसन्नभुजान्न - अवसन्नभुजात् + न ।

गलद्विवेद - गलद् + विवेद ।



| अन्वयः | अन्वयार्थः |
|---|---|
| दयितजयमङ्गलैषिणी | भर्तुः विजयाभिलाषिणी |
| विलासिनी | युवतिः |
| लोचनजलानि | अश्रूणि |
| न मुमोच। | न अमुञ्चत्। |
| अवसन्नभुजात् | (विषादेन) अवनतहस्तात् |
| गलद् | भ्रंशत् |
| वलयम् | कङ्कणम् |
| अवनिम् | पृथ्वीम् |
| यातम् | प्राप्तम् (पतितम् इति यावत् ) |
| न विवेद। | न अजानात्। |

**विग्रहवाक्यानि**

विलासिनी - विलासोऽस्या अस्तीति।

लोचनजलानि - लोचनात् जातानि जलानि।

अवसन्नभुजात् - अवसन्नः भुजः तस्मात्।
दयितजयमङ्गलैषिणी - दयितस्य जयमङ्गलं दयितजयमङ्गलं, तद् या इच्छति सा।

**आशयः**

श्रीकृष्णशिशुपालयोः युद्धे शिशुपालस्य साहाय्यार्थं प्रस्थितस्य कस्यचन राजभटस्य भार्या धीरवनिता इव स्वभर्त्रे यात्रानुमतिं दत्तवती। भर्ता युद्धाय गच्छति इति सा उत्कण्ठां न प्रकटयामास। तस्याः अश्रूणि न निर्गतानि। तथा भुजावसन्नं वलयं भूमौ पतितमपि तया न ज्ञातम्।

**वृत्तम्**

**उद्गता ।** तल्लक्षणं यथा –
सजमादिमे सलघुके च , नसजगुरुकेष्वथोद्गता।
अङ्घ्रिगतभनजलागयुताः , सजसा जगौ चरणमेकतः पठेत्। -इति।

## नैषधीयचरितम्।

श्रीहर्षेण विरचितं महाकाव्यं भवति नैषधीयचरितम्। अस्य आशयगम्भीरतया नैषधं विद्वदौषधम् इत्युक्तिरप्यस्ति। निषधाधिपतेर्नलस्य वैदर्भ्याः दमयन्त्याः च मिथः अनुरागः पश्चात्तेषां विवाहादयः नैषधीयचरितेऽनुवर्णिताः। एकविंशतिः सर्गास्सन्त्यस्मिन् काव्ये। अस्य नवमसर्गाद् उद्धृतोऽयं श्लोकः। दमयन्तीं परिणेतुं प्रस्थितं नलमुपागम्य इन्द्राग्निवायुयमवरुणदेवाः दमयन्तीं प्रति तेषामनुरागं प्रकटयन्ति। तथा तेषां वैवाहिकदूतत्वेन नलमेव दमयन्तीसविधं प्रेषयन्ति च। तत्र प्राप्तः नलः दूतस्य कुलनामादिके विषये दमयन्तीकृतप्रश्नानाम् उत्तरं न दत्तवान्। अतः सा तम् एवमुक्तवती। यथा-

**मयापि देयं प्रतिवाचिकं न ते**
**स्वनाम मत्कर्णसुधामकुर्वते।**
**परेण पुंसा हि ममापि सङ्कथा**
**कुलाबलाचारसहासनासहा ।।** ( नैषधीयचरितम्– 9/16)

**पदच्छेदः**

ममयापि - मया + अपि।
ममापि - मम + अपि।
मत्कर्णसुधामकुर्वते - मत्कर्णसुधाम् +अकुर्वते।



| अन्वयः | अन्वयार्थः |
| --- | --- |
| स्वनाम | निजनाम |
| मत्कर्णसुधाम् | मम कर्णामृतम् |
| अकुर्वते | न कृतवते। |
| ते | तुभ्यम् (नलाय) |
| मयापि | आत्मना अपि |
| प्रतिवाचिकम् | प्रत्युत्तरम् |
| न देयम्। | न दातव्यम्। |
| हि | यतः |
| मम अपि | आत्मनोऽपि |
| परेण | अन्येन |
| पुंसा | पुरुषेण (सह) |
| सङ्कथा | मिथः भाषणम् (तथा) |
| कुलाबलाचारसहासनासहा (भवति) | कुलस्त्रीणां शीलत्वात् सहासनत्वं च (सहवासः अथवा एकस्मिन् आसने उपवेशनम्) सोढुं न शक्यं भवति। |

**विग्रहवाक्यानि**

कर्णसुधाम् - कर्णयोः सुधा कर्णसुधा, ताम् ।

कुलाबलाचारसहासनासहा - कुले जाताः अबलाः कुलाबलाः, तासाम् आचारः कुलाबलाचारः,तेन सहासनं न सहते इति।

**आशयः**

आगतः स्वनामादिकं न वदति चेत् तस्मै मया प्रत्युत्तरं न दातव्यम् । यतो हि अज्ञातकुलशीलैः पुरुषैः सह भाषणं एकान्ते वासः च कुलस्त्रीणाम् उचितं न भवति इति तात्पर्यार्थः ।

**वृत्तम्** - **वंशस्थम्।**

तल्लक्षणं यथा – **जतौ तु वंशस्थमुदीरितं जरौ।**

**कोशः**

दयितः - दयितो वल्लभः प्रियः।
वलयम् - कटको वलयः।
लोचनम् - ईक्षणं नयनं चक्षुः अक्षि लोचनमम्बकम्।
जयः - विजयो जयः।
सुधा - पीयूषममृतं सुधा ।
हि - हि स्याद्विशेषणे हेतौ हि हेताववधारणे।

**द्विकर्मकप्रयोगः।**

दुह् याच् पच् दण्ड् रुध् प्रच्छ् चि ब्रु शास् जि मथ् मुष् नी ह कृष् वह् एते षोडश धातवः तथा एतेषाम् अर्थयुक्तधातवश्च द्विकर्मकधातवः इति प्रसिद्धाः भवन्ति। एतेषां प्रयोगे वाक्ये कर्मद्वयं स्यात्। कर्मणि द्वितीया( २-३-२) इति सूत्रेण द्वितीया विभक्तिश्च।

यथा–

गिरिशाय गिरिजां गिरीशं ययाचे।

अत्र गिरिजाम् ,गिरीशम् इति कर्मद्वयम्। तयोः प्रधानकर्म - गिरिजाम् , अप्रधानकर्म - गिरीशम् इति विशेषः। प्रधानकर्म मुख्यम् इति अप्रधानकर्म गौणम् इति च कथ्यते।

**अर्थभेदः**

गिरिशः - गिरिराश्रयत्वेन (वसतित्वेन) अस्ति अस्य इति । शिवः।

गिरीशः - गिरीणां पर्वतानाम् ईशः -हिमालयः।

## पठनप्रवर्तनानि।

**पाठभागस्थान् श्लोकान् वैयक्तिकरूपेण सङ्घरूपेण वा कक्ष्यायाम् आलपतु।**

**श्रद्धेयाः अंशाः**

अक्षरस्फुटता ,
पदच्छेदः,
आशयव्यक्तता।

**पाठं सम्यक् पठित्वा अन्वयं विलिख्य प्रदर्शयतु।**

**श्रद्धेयाः अंशाः**

अक्षरशुद्धिः,
आशयावबोधः,
उचितः वाक्यप्रयोगः।

**पञ्चमहाकाव्यान्यधिकृत्य सूचनानुसारं टिप्पणीं लिखत।**

(*आमुखम्*- काव्यभेदः- प्रसिद्धाः भारतीयाः संस्कृतकवयः- पञ्चमहाकाव्यानि- तेषां कर्तारः- उपसंहारः)

**श्रद्धेयाः अंशाः**

चर्चा,
दत्तानां समाहरणम्,
अवलोकनम् ,
अक्षरशुद्धिः,
आशयस्पष्टता।

**दृश्यश्राव्यमाध्यमानां साहाय्येन तथा ICT साध्यताः च उपयुज्य पौराणिक - नारीणाम् आधुनिकनारीणां च अवस्थायाः तुलनां कृत्वा टिप्पणीं लिखत।**

**श्रद्धेयाः अंशाः**

चर्चा ,
दत्तानां समाहरणम्,
अवलोकनम्,
अक्षरशुद्धिः,
आशयस्पष्टता ।

**पाठभागस्थश्लोके विद्यमानानाम् अक्षराणां गुरु-लघु विविच्य वृत्तं निर्णयतु।**

**श्रद्धेयाः अंशाः**

चर्चा,

गुरु-लघुनिर्धारणम्,

वृत्तनिर्णयः।

**प्रादेशिकभाषासु भाषान्तरेषु वा प्रकाशिताभ्यः कविताभ्यः नारीप्रधानाः कविताः पङ्क्तीः वा समाहृत्य सम्पुटमेकं प्रकाशयतु।**

( यथा-करुणा, नलिनी, चिन्ताविष्टयाय सीता, मग्दलनमरियं, पिङ्गला )

**श्रद्धेयाः अंशाः**

स्त्रीणां प्राधान्यम्,

औचित्यम्,

कवेः कवितायाश्च नाम।

## अधिकविस्तरः।

**लघुत्रयी- बृहत्त्रयी**

कालिदासप्रणीतं काव्यत्रयं कुमारसम्भवम् रघुवंशम् मेघदूतम् च लघुत्रयी। भारवेः किरातार्जुनीयम् माघस्य शिशुपालवधम् श्रीहर्षस्य नैषधीयचरितम् चेति काव्यत्रयं बृहत्त्रयी।

**सप्तर्षयः**

**मरीचिःपूर्वभागस्थो वसिष्ठः परतस्ततः।**
**ततोऽङ्गिरास्ततश्चात्रिः पुलस्त्यः पुलहः क्रतुः।।**

मन्वन्तरानुसारं सप्तर्षीणामपि नामानि भिन्नानि दृश्यन्ते। ऋषयः ब्रह्मर्षिः देवर्षिः महर्षिः परमर्षिः काण्डर्षिः श्रुतर्षिः राजर्षिरिति सप्तधा भवन्ति। वसिष्ठाद्याः ब्रह्मर्षयः। कण्वादयो देवर्षयः। व्यासाद्या महर्षयः। भेलाद्याः परमर्षयः। जैमिन्याद्याः काण्डर्षयः। सुश्रुताद्याः श्रुतर्षयः। विश्वामित्रादयः राजर्षयश्च।

**कविकुलगुरुः कालिदासः।**

सन्देशकाव्यसरण्यां मार्गदीपः भवति कालिदासस्य मेघदूतम्। श्रुतबोधः, नलोदयः, चिद्गगनचन्द्रिका, ज्योतिर्विदाभरणम् इत्येताः कृतयः अपि कालिदासस्य इति श्रूयते। ऋतुवर्णनात्मकः ऋतुसंहारः अपि अस्य कृतिरिति केचिदामनन्ति। उपमालङ्कारप्रयोगे अतीव तत्परः कृतहस्तश्चासीदयम्। ‘ उपमा कालिदासस्य ’ इति लोकोक्तिः अप्यस्ति।अस्य भाषा सरला सरसा च भवति। कालिदासकृतिभ्यः तस्य शास्त्रीयज्ञानस्य अगाधतां स्पष्टमवगन्तुं शक्यते। रघुवंशे शाकुन्तले च विद्यमानैः प्रकृतिचित्रणैः पारिस्थितिकविषये कवेः अतुला श्रद्धा अभिव्यञ्जन्ति।

**कुमारसम्भवस्य प्रथमसर्गे प्रथमश्लोकः।**

“ अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः।। ”

**रघुवंशे प्रथमश्लोकः।**

“ वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।। ”

**किरातार्जुनीये प्रथमसर्गे प्रथमश्लोकः।**

“ श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः।। ”

**शिशुपालवधे प्रथमश्लोकः।**

“ श्रियःपतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।
वसन्ददर्शावतरन्तमम्बराद् हिरण्यगर्भाङ्गभुवं मुनिं हरिम्।। ”

**नैषधीयचरिते प्रथमसर्गे प्रथमश्लोकः।**

“ निपीय यस्य क्षितिरक्षिणः कथां तथाद्रियन्ते न बुधास्सुधामपि।
नलस्सितच्छत्त्रितकीर्तिमण्डलस्स राशिरासीन्महसां महोज्ज्वलः।। ”

**कविप्रशस्तिः।**

"उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।"

..............

"नवसर्गगते माघे नवशब्दो न विद्यते।।"

.........

"तावद् भारवेर्भाति यावन्माघस्य नोदयः।
उदिते नैषधे काव्ये क्व माघः? क्व च भारविः?।।"

## धातुकोशः।

**अहासीः।** ओहाक् त्यागे - परस्मैपदी - लुङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम |
|---|---|---|---|
| प्र.पु | अहासीत् | अहासिष्टाम् | अहासिषुः |
| म.पु | अहासीः | अहासिष्टम् | अहासिष्ट |
| उ.पु | अहासिषम् | अहासिष्व | अहासिष्म । |

**मुमोच।** मुच्लृ मोचने - उभयपदी - लिट् (परस्मैपदी)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.प | मुमोच | मुमुचतुः | मुमुचुः |
| म.पु | मुमोचिथ | मुमूचथुः | मुमुच |
| उ.पु | मुमोच | मुमुचिव | मुमुचिम । |

**गणयामास** - गण संख्याने - सकर्मक परस्मैपदी लिट् ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु | गणयामास | गणयामासतुः | गणयामासुः। |
| म.पु | गणयामासिथ | गणयामासथुः | गणयामास । |
| उ.पु | गणयामास | गणयामासिव | गणयामासिम। |

**वेद।** विद ज्ञाने - प.प - लट् - प्र पु - ए व।

**विदो लटो वा (३-४-८३)** इति नियमेन णलादीन् बाधित्वा वेद इति रूपम्। तदभावपक्षे वेत्ति इत्यादीनि रूपाणि।

| विद ज्ञाने - प.प - लट् | | | | **विदो लटो वा** इति नियमेन | | |
|---|---|---|---|---|---|---|
| वेत्ति | वित्तः | विदन्ति | **प्रथमपुरुषः** | वेद | विदतुः | विदुः |
| वेत्सि | वित्थः | वित्थ | **मध्यमपुरुषः** | वेत्थ | विदथुः | विद |
| वेद्मि | विद्वः | विद्मः। | **उत्तमपुरुषः** | वेद | विद्व | विद्म । |

**विवेद।** विद ज्ञाने - प.प - लिट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.प | विवेद | विविदतुः | विविदुः। |
| म.पु | विवेदिथ | विविदथुः | विविद। |
| उ.पु | विवेद | विविदिव | विविदिम। |

**रुजन्ति।** रुजो भङ्गे - प.प - लट् - प्र पु - ब व।

## सतिसप्तमीप्रयोगः।

एवं वादिनि देवर्षौ - सतिसप्तमीप्रयोगः।

देवर्षौ - देवर्षिशब्दस्य सप्तमीविभक्तौ प्रयोगः।वादिनि- वादिन् शब्दस्य सप्तमीविभक्तौ।

यत्र ज्ञातकालक्रियया सह अज्ञातकालक्रियायाः कालादयः द्योत्यन्ते तत्र सप्तमी प्रयुज्यते। गोषु दुह्यमानासु गतः इत्यत्र गमनक्रियायाः अज्ञातत्वं दोहनक्रियायाः ज्ञातत्वं च। दोहनक्रियया गमनक्रियायाः कालमत्र बुद्ध्यते। सतिसप्तमी इति व्यवह्रियमाणेषु एतादृशप्रयोगेषु क्रियायाः एककालिकत्वम् आवश्यकमेव।

## द्विकर्मकधातवः

| | | |
|---|---|---|
| दुह् - दोग्धि, | याच् - याचते , | पच् - पचति(ते), |
| दण्ड् - दण्डयति , | रुध् - रुणद्धि , | प्रच्छ् - पृच्छति, |
| चि - चिनोति, | ब्रु - ब्रूते , | शास् - शास्ति, |
| जि - जयति , | मथ् - मथ्नाति , | मुष् - मुष्णाति , |
| नी - नयति, | हृ - हरति , | कृष् - कर्षति , |

वह्- वहति -एते द्विकर्मकधातवः।

**डुयाच्ञृ याञ्चायाम्**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्र. प.** | ययाचे | ययाचते | ययाचिरे |
| **म. पु.** | ययाचिषे | ययाचाथे | ययाचिध्वे |
| **उ. पु.** | ययाचे | ययाचिवहे | ययाचिमहे |

## चाक्रिकारोहणप्रक्रिया -

**दृश्यश्रव्यकाव्ययोः इष्टतरं किमिति चर्चित्वा कारणं वदतु।**

# पाठः ८

# शिवास्ते सन्तु पन्थानः।

महाकवेः कालिदासस्य प्रतिभया वाग्विलासेन च परिलसत् विश्वप्रसिद्धं संस्कृतनाटकं भवति अभिज्ञानशाकुन्तलम्। सप्तभिः अङ्कैर्युक्तस्यास्य चतुर्थोऽङ्कः मानविकतायाः तथा लौकिकजीवनस्य च सूक्ष्मभावानां वर्णनेन जनमनांसि संस्पृशति। तत्रस्थाः चत्वारः श्लोकाः नाटकस्य समग्रां प्रौढिं कवेः वर्णनापाटवं च प्रकाशयितुं समर्था एव। तदुक्तं पण्डितैः-

> काव्येषु नाटकं रम्यं
> तत्र शाकुन्तलं मतम्।
> शाकुन्तले चतुर्थोऽङ्कः
> तत्र श्लोकचतुष्टयम्।।

मृगयार्थं गतः दुष्यन्तः यदृच्छया कण्वतपोवनं प्रविवेश। तत्र सः शकुन्तलां दृष्ट्वा तस्याम् अनुरक्तो बभूव। ततः तेन दुष्यन्तेन गान्धर्वविधिना सा शकुन्तला परिणीता च। कृत्यान्तरबाहुल्यात् दुष्यन्तः प्रतिनिवृत्तः। तदा प्रभृति तमेव राजानं विचिन्तयन्ती शकुन्तला आश्रमे एव कालमनयत्। तदन्तरे सा आश्रममागतं दुर्वाससं नाजानात्। तया अनादृतः महर्षिः '*स्मरिष्यति त्वां न स बोधितोऽपि सन्*' इति तां शशाप।

तीर्थयात्रानन्तरम् आश्रमं प्रत्यागतः कण्वः शकुन्तलायाः गान्धर्वविवाहवार्तां ज्ञात्वा शार्ङ्गरवादिबन्धुभिस्सह आपन्नसत्वां तां दुष्यन्तस्य राजभवनं प्रेषयितुं निश्चिनोति। तां समुचितोपदेशैः प्रेषयति च। तदा कण्वमहर्षेः यात्रामङ्गलवचनमेवात्र पाठभागत्वेन स्वीकृतम्।

## अभिज्ञानशाकुन्तलम्।

**कर्ता** - कालिदासः।
**इतिवृत्तम्** - महाभारतात् स्वीकृतं शकुन्तलोपाख्यानम्।
**अङ्काः** - सप्त ।
**रसः** - शृङ्गारः ।

**कालिदासस्य अन्ये नाटके**

१) मालविकाग्निमित्रम्।
२) विक्रमोर्वशीयम् ।

(ततः प्रविशति चिन्तामग्नः कण्वः।)

**कण्वः** - (आत्मगतं) **किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तवचोभिः सन्देष्टव्यम्?**

(इति चिन्तयति।)

**वत्स! शार्ङ्गरव! इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः।**

**शाङ्र्गरवः** - **आज्ञापयतु भवान्।**

**पदार्थः**

तत्रभवतो - तत्रभवत इति आदरसूचको व्यवहारः।

दुष्यन्तस्य - दुष्यन्तमहाराजस्य।

युक्तवचोभिः - उचितैः व्यवहारैः।

किं नु खलु - किं वा (प्रश्नार्थे प्रयोगः)


सन्देष्टव्यम् - सन्देशरूपेण वक्तव्यम्।

इति मद्वचनात् - एवं प्रकारेण मम वचोभिः।

स राजा - दुष्यन्तः।

शकुन्तलां पुरस्कृत्य - शकुन्तलां पुरतः निधाय (तस्याः सान्निध्ये इत्यर्थः)

वक्तव्यः - कथनीयः। शार्ङ्गरव! शकुन्तलायाः समक्षं दुष्यन्तमहाराजः त्वया एवं बोधनीय इत्यर्थः।



**विग्रहः**

मद्वचनात् - मम वचनात्।

**पदच्छेदः**

अङ्कैर्युक्तस्यास्य - अङ्कैः + युक्तस्य + अस्या

नाजानात् - न + अजानात्

कण्वः - अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः।।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| संयमधनान् अस्मान् | - | तपोधनान् अस्मादृशान्। |
| आत्मनः उच्चैः कुलं च | - | स्वस्य(दुष्यन्तस्य) समुन्नतं वंशं च। |
| त्वयि अस्याः | - | राज्ञि( दुष्यन्ते) शकुन्तलायाः। |
| कथमपि | - | येन केनापि प्रकारेण। |
| अबान्धवकृतां | - | वधूबन्धूनां साहाय्यं विना। |
| तां स्नेहप्रवृत्तिं | - | निष्कलङ्कां स्नेहप्रवृत्तिं च। |
| साधु विचिन्त्य | - | सम्यग् विचार्य। |
| त्वया सामान्यप्रतिपत्तिपूर्वकं | - | भवता ( दुष्यन्तेन) सामान्यस्नेहभावेन। |
| दारेषु | - | पत्नीषु। |
| इयं दृश्या। | - | एषा (शकुन्तला) परिगणनीया। |
| अतः परम् | - | अतोऽप्यधिकम् । |
| भाग्यायत्तम् | - | भाग्याधीनम्। |
| वधूबन्धुभिः | - | वधूजनबान्धवैः। |
| न तद्वाच्यम् खलु | - | न वक्तव्यम् खलु। |

**पदच्छेदः**

| | | |
|---|---|---|
| संयमधनानुच्चैः | - | संयमधनान् + उच्चैः |
| कथमप्यबान्धवकृतां | - | कथम् + अपि + अबान्धवकृताम्। |
| चात्मनस्त्वय्यस्याः | - | च + आत्मनः + त्वयि +अस्याः |

**विग्रहः**

| | | |
|---|---|---|
| संयमधनान् | - | संयमः एव धनं येषां ते संयमधनाः,तान्। |
| अबान्धवकृतां | - | न बान्धवकृता अबान्धवकृता, ताम्। |

| | | |
|---|---|---|
| **शार्ङ्गरवः** | - | **गृहीतः सन्देशः।** |
| **कण्वः** | - | (शकुन्तलां विलोक्य) **वत्से! त्वमिदानीमनुशासनीयासि।** |
| | | **वनौकसोऽपि सन्तः लोकज्ञाः वयम्।** |
| **शार्ङ्गरवः** | - | **भगवन्! न खलु धीमतां कश्चिदविषयो नाम।** |
| **कण्वः** | - | **वत्से, त्वमितः पतिगृहं प्राप्य-** |

---

| | | |
|---|---|---|
| स्नेहप्रवृत्तिं | - | स्नेहेन प्रवृत्तिः स्नेहप्रवृत्तिः,ताम्। |
| वधूबन्धुभिः | - | वध्वोः बन्धवः वधूबन्धवः, तैः। |
| भाग्यायत्तं | - | भाग्येन आयत्तम्। |

**भावार्थः -**

भो! राजन् अस्मान् संयमधनान् तपोधनान् मत्वा तथा भवतः कुलं समुन्नतम् इति च विचार्य तद्वत् त्वयि (राज्ञि दुष्यन्ते) अस्याः शकुन्तलायाः स्नेहप्रवृत्तिः निष्कलङ्का बन्धुजनप्रेरणां विना परस्परानुरागेण संभूता इति सम्यग्विचार्य च भवता दुष्यन्तेन अन्यदारेष्विव सामान्यस्नेहभावेन एषा शकुन्तलापि गणनीया। अतः परं भाग्याधीनं, तत्तु वधूबन्धुजनैः न वक्तव्यं खलु।

**पदच्छेदः**


| | | |
|---|---|---|
| त्वमिदानीमनुशासनीयासि। | - | त्वम् + इदानीम् + अनुशासनीया + असि। |
| वनौकसोऽपि | - | वनौकसः + अपि। |
| कश्चिदविषयो | - | कश्चिद् + अविषयः। |

**पदार्थः -**

| | | |
|---|---|---|
| इदानीम् | - | अधुना (पतिगृहगमनवेलायाम्) |
| अनुशासनीया | - | उपदेष्टव्या। |
| वनौकसः | - | वनवासिनः। |
| धीमतां | - | बुद्धिमताम्। |
| अविषयः | - | अगोचरः(अप्रमेय इति यावत्।) |
| न खलु धीमतां कश्चिदविषयो नाम | - | कण्वसदृशानां बुद्धिमतां ज्ञानस्य अविषयः कश्चिदपि न भवेत्। सर्वं तदेव जानातीत्यर्थः। |

**शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने**
**भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।**
**भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी**
**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।।**
**कथं वा गौतमी मन्यते?**

**गौतमी - एतावान् वधूजनस्योपदेशः। जाते! एतत् सर्वमवधारय।**



**विग्रहः**

वनौकसः - वनम् ओकः येषां ते।
लोकज्ञाः - लोकं जानन्ति इति।
धीमताम् - धीःएषाम् अस्ति इति तेषाम् ।

**पदच्छेदः**

भर्तुर्विप्रकृतापि - भर्तुः + विप्रकृता + अपि।
भाग्येष्वनुत्सेकिनी - भाग्येषु + अनुत्सेकिनी ।
यान्त्येवम् - यान्ति + एवम्।
कुलस्याधयः - कुलस्य + आधयः।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| गुरून् शुश्रूषस्व | - | गुरुजनान् सेवस्व |
| सपत्नीजने | - | राज्ञः अन्यभार्यासु |
| प्रियसखीवृत्तिं कुरु | - | उत्तमसखीजनवृत्तिम् आचर। |
| विप्रकृतापि | - | अनादृता अपि |
| रोषणतया | - | कोपेन |
| भर्तुः प्रतीपं | - | पत्युः प्रतिकूलम् |

| | | |
|---|---|---|
| **शकुन्तला** | - | **तात! इत एव किं प्रियसख्यौ निवर्तिष्येते।** |
| **कण्वः** | - | **वत्से! इमेऽपि प्रदेये। न युक्तमनयोस्तत्र गमनम्। त्वया सह गौतमी यास्यति।** |
| **शार्ङ्गरव** | - | **भगवन्! दूरमधिरूढः सविता। तत्त्वरय अत्रभवतीम्।** |
| **शकुन्तला** | - | (आश्रमाभिमुखी भूत्वा) **तात! कदा नु भूयस्तपोवनं प्रेक्षिष्ये।** |
| **कण्वः** | - | **श्रूयताम्।** |

---

| | | |
|---|---|---|
| मा स्म गमः। | - | मा गच्छ। (मा कुरु) |
| परिजने | - | सेवकेषु। |
| भूयिष्ठं दक्षिणा भव। | - | अत्यधिकम् उदारशीला भव। |
| भाग्येषु | - | ऐश्वर्येषु |
| अनुत्सेकिनी भव। | - | गर्विष्ठा मा भव। |
| एवं युवतयः | - | पूर्वोक्तप्रकारेण यौवनयुक्ताः नार्यः |
| गृहिणीपदं यान्ति। | - | उत्तमगृहस्था इति प्रशस्तिं प्राप्नुवन्ति। |
| वामाः | - | एतद्विरुद्धमाचरन्त्यः |
| कुलस्याधयः। | - | वंशस्य दोषकारिण्यः भवन्ति। |

**भावार्थः**

गुरुजनान् सेवस्व, सपत्नीवर्गे प्रियसखीवद् व्यवहारं कुरु, तिरस्कृतापि कोपनतया भर्तुः प्रतिकूलतां न गच्छ, परिचारकवर्गे अत्यधिकम् उदारशीला भव, समृद्धिषु गर्वरहिता भव। एवं स्त्रियः उत्तमकुटुम्बिनीस्थानं प्राप्नुवन्ति। विपरीताः वंशस्य दुःखकारणानि भवन्ति।

**विग्रहः -**

| | | |
|---|---|---|
| सपत्नीजने | - | समानः पतिः यासां ताः सपत्न्यः। तत्समूहे जने। |

**पदच्छेदः -**

| | | |
|---|---|---|
| वधूजनस्योपदेशः | - | वधूजनस्य + उपदेशः। |
| इमेऽपि | - | इमे + अपि । |
| युक्तमनयोस्तत्र | - | युक्तमनयोः + तत्र। |
| तत्त्वरय | - | तत् + त्वरय। |

**भूत्वा चिराय चतुरन्तमहीसपत्नी**
**दौष्यन्तिमप्रतिरथं तनयं प्रसूय।**
**भर्त्रा तदर्पितकुटुम्बभरेण सार्धं**
**शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्।**
**गच्छ! शिवास्ते सन्तु पन्थानः।**

(इति निष्क्रान्ताः शकुन्तलया सह गौतमीशार्ङ्गरवशारद्वतमिश्राः)

---

**पदार्थः**

सर्वमवधारय - सम्यगवगच्छ।
इमेऽपि प्रदेये - इमे द्वे (अनसूया प्रियंवदा च) भर्तृभ्यां प्रदेये,
दूरमधिरूढः- बहुदूरं गतः।
सविता - सूर्यः।
तत्त्वरय - तस्मात् शीघ्रगमनाय प्रेरय इति ।



**पदच्छेदः**

भूयस्तपोवनम् - भूयः + तपोवनम्।
पुनराश्रमेऽस्मिन् - पुनः + आश्रमे +अस्मिन्।
शिवास्ते - शिवाः + ते।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| चिराय | बहुकालम् |
| चतुरन्तमहीसपत्नी भूत्वा | चतसृषु दिक्षु व्याप्तायाःभूमेः सपत्नी भूत्वा। |

| | | |
|---|---|---|
| **सख्यौ** | - | (शकुन्तलां विलोक्य ) **हा धिक्! हा धिक्! अन्तर्हिता शकुन्तला वनराजिभिः।** |
| **कण्वः** | - | (सनिश्वासं) **अनसूये! प्रियंवदे! गता वां सहचरी ; निगृह्य शोकम् मामनुगच्छतम्।** |
| **उभे** | - | **तात! शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशामः।** |
| **कण्वः** | - | **स्नेहप्रवृत्तिरेवंदर्शिनी।** (सविमर्शं परिक्रम्य) **हन्त! भोः शकुन्तलां पतिगृहे विसृज्य लब्धमिदानीं स्वास्थ्यम्। कुतः-** |

---

| | | |
|---|---|---|
| अप्रतिरथम् | - | प्रतियोद्धरहितम् |
| दौष्यन्तिं तनयं प्रसूय | - | दुष्यन्तपुत्रं प्रसूय |
| तदर्पितकुटुम्बभरेण | - | तस्मिन्नेव पुत्रे कुटुम्बभारं समर्प्य |
| भर्त्रा सार्धं (त्वम्) | - | पत्या सह (दुष्यन्तेन सह शकुन्तला) |
| शान्तेऽस्मिन् आश्रमे | - | प्रशान्ते अस्मिन् तपोवने |
| पुनः पदं करिष्यसि, | - | पुनरागन्तुं शक्ता भविष्यसि, |
| शिवास्ते पन्थानः सन्तु। | - | ते मार्गाः मङ्गलप्रदायकाः भवन्तु। |

**विग्रहः -**

| | | |
|---|---|---|
| चतुरन्तमहीसपत्नी | - | चत्वारः अन्ताः यस्याः सा चतुरन्ता, चतुरन्ता चासौ मही च चतुरन्तमही, तस्याः सपत्नी । |
| दौष्यन्तिम् | - | दुष्यन्तस्य अपत्यं पुमान् दौष्यन्तिः, तम्। |
| अप्रतिरथं | - | अविद्यमानः प्रतिरथः यस्य सः अप्रतिरथः, तम्। |
| तदर्पितकुटुम्बभरेण | - | अर्पितः कुटुम्बभरः यस्मै सः, तदर्पितकुटुम्बभरः तेन। |
| तपोवनम् | - | तपसे वनम्। |

**भावार्थः :-**

बहुकालं यावत् चतुस्सीमायुक्तस्य राज्यस्य सपत्नी भूत्वा जगदेकवीरं सुतं प्रसूय क्रमेण पुत्रे राज्यभारं निवेश्य पत्या सह पुनरपि पावनमिममाश्रमम् आगमिष्यसि। वानप्रस्थाश्रमयोग्ये काले पुनरत्र आगमिष्यसीति भावः।

**अर्थो हि कन्या परकीय एव**
**तामद्य संप्रेष्य परिग्रहीतुः।**
**जातो ममायं विशदः प्रकामं**
**प्रत्यर्पितन्यास इवान्तरात्मा।।** इति

(निष्क्रान्ताः सर्वे।)

---

**पदार्थः -**

| | | |
|---|---|---|
| हा धिक्! | - | कष्टम्। (शोकद्योतकम् अव्ययम्)। |
| अन्तर्हिता | - | अप्रत्यक्षा।(तिरोभूता) |
| वनराजिभिः। | - | काननश्रेणीभिः। |
| वाम् | - | युवयोः (अनसूयाप्रियंवदयोः)। |
| निगृह्य | - | संयम्य। |
| अनुगच्छतम् | - | अनुयातम् (युवां माम् अनुसरतम् इति यावत्)। |

**पदच्छेदः**

| | | |
|---|---|---|
| स्नेहप्रवृत्तिरेवम् | - | स्नेहप्रवृत्तिः + एवम्। |
| लब्धमिदानीम् | - | लब्धम् + इदानीम्। |
| अर्थो हि | - | अर्थः + हि। |
| परकीय एव | - | परकीयः + एव। |
| जातो ममायम् | - | जातः+मम + अयम्। |
| प्रत्यर्पितन्यास इवान्तरात्मा | - | प्रत्यर्पितन्यासः+ इव + अन्तरात्मा। |

**विग्रहः -**

| | | |
|---|---|---|
| वनराजिभिः | - | वनानां राजिः वनराजिः , ताभिः। |
| सहचारिणी | - | सह चरितुं शीलं यस्याः सा। |
| परकीयः | - | परस्य अयम्। |
| प्रकामं | - | प्रगतं कामम्। |
| प्रत्यर्पितन्यासः | - | प्रत्यर्पितः न्यासः येन सः। |

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| कन्या हि | - | कन्यका (हि अवधारणार्थे प्रयुक्तमव्ययम्।) |
| परकीय अर्थः एव | - | अन्यस्य धनम् एव। |
| अद्य तां | - | अस्मिन् दिने शकुन्तलाम् |
| परिग्रहीतुः | - | परिणेतुः भर्तुः वा |
| संप्रेष्य | - | (भवनं प्रति) समुचितया रीत्या प्रेष्य |
| मम | - | मे (कण्वस्य) |
| अयम् अन्तरात्मा | - | इदं मनः |
| प्रत्यर्पितन्यास इव | - | न्यासवस्तुनः प्रत्यर्पणेन इव |
| प्रकामं | - | यथेच्छं (कर्म आचरितं इत्यतः) |
| विशदः | - | प्रसन्नः |
| जातः। | - | संवृत्तः। |

**भावार्थः :-**

कन्या तु परस्य धनमेव। अद्य तां कन्यां (शकुन्तलां ) यथोचितं भर्तृगृहं संप्रेष्य न्यासवस्तुनः प्रत्यर्पणेन यादृशमानन्दम् अनुभवति तादृशं मे (कण्वस्य) मनः प्रसन्नं संवृत्तम्।

## पठनप्रवर्तनानि।

**नाटकांशं भावानुसारं सम्यक् पठतु ।**

**श्रद्धेयाः अंशाः**

पदच्छेदः।

पदार्थज्ञानम्।

आशयावगमनम्।

**नाटकांशं सम्यक् पठित्वा कथारूपेण संक्षिप्य लिखतु ।**

**श्रद्धेयाः अंशाः**

आशयसंग्रहः ।

उचितपदस्वीकारः ।

भाषाशुद्धिः ।

कथाशैली।

**पाठोक्तदिशा कण्वमुनेः स्वभावः कीदृश इति निरूपयत।**

**श्रद्धेयाः अंशाः**

कथापात्रस्वभावावगमनम् ।

उचितपदस्वीकारः ।

भाषाशुद्धिः ।

**पाठभागात् सम्बोधनपदानि चित्वा तान्युपयुज्य वाक्यानि लिखन्तु।**

**श्रद्धेयौ अंशौ**

उचितपदस्वीकारः ।

भाषाशुद्धिः ।

**पाठभागात् क्त्वान्त- ल्यबन्त -तुमुन्नन्तानि अन्यानि च अव्ययानि चित्वा पट्टिकां कुरुत। तानि उपयुज्य वाक्यानि च लिखन्तु।**

श्रद्धेयाः अंशाः-अव्ययज्ञानम् ।पट्टिकाकरणसामर्थ्यम्।उचितवाक्यप्रयोगः।

पदार्थज्ञानम्। भाषाशुद्धिः ।

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् | अन्यानि |
|---|---|---|---|
| | | | |

**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः' इत्याशयं पुरस्कृत्य समकालिकीं कुटुम्बस्थितिमधिकृत्य चर्चां करोतु।टिप्पणीं लिखतु।**

**श्रद्धेयौ अंशौ**

भाषाशुद्धिः ।

आशयसंग्रहः ।

**नाटकांशं पठित्वा रङ्गावतारणाय पटकथां रचयत।**

**श्रद्धेयाः अंशाः-**

भाषाशुद्धिः । आशयसंग्रहः। उचितपदस्वीकारः ।

**चर्चां कृत्वा आस्वादनटीकां लिखत।**

१. शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशामः।

२. प्रत्यर्पितन्यास इवान्तरात्मा।

**श्रद्धेयाः अंशाः**

टीकास्वरूपम् ।भाषाशुद्धिः ।

आशयसंग्रहः ।

## अधिकवाचनांशः।

**व्याकरणविशेषः**

- मा स्म प्रतीपं गमः -अत्र माङ् इत्यव्ययात् स्म शब्दे परे धातोः लङ्, लुङ् च भवति (स्मोत्तरे लङ् च) गम् धातोः लुङ् रूपं भवति अगमः। एवम् अत्र अगमः इति प्रयोगः अनिवार्यः । किन्तु ' न माङ्योगे ' इत्यनेन सूत्रेण आडागमनिषेधात् अकारलोपे ' गमः ' इत्येवं दृश्यते।
- पन्थानः इति नकारान्तपुल्लिङ्गस्य पथिन् शब्दस्य बहुवचनरूपं भवति ।
  प्रथमाविभक्तिरूपाणि - पन्थाः पन्थानौ पन्थानः ।
- असौ अमू अमी (पुल्लिङ्गः)
  असौ अमू अमूः (स्त्रीलिङ्गः)

## अमरकोशः।

भार्या - भार्या जायाथ पूंभूम्नि दाराः स्यात्तु कुटुम्बिनी
पुरन्ध्री सुचरित्रा तु सती साध्वी पतिव्रता।

तनयः - आत्मजस्तनयः सूनुः पुत्रः स्त्रियां त्वमी ।

भर्ता - धवः प्रियः पतिर्भर्ता।

वधू - स्त्रीयोषिदबला योषा नारी सीमन्तिनी वधूः। प्रतिदर्शिनी वामा वनिता महिला तथा।

सविता - भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ।

# धातुपरिचयः।

करिष्यति- - कृञ् करणे परस्मैपदी लृट्।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु | करिष्यति | करिष्यतः | करिष्यन्ति |
| म.पु | करिष्यसि | करिष्यथः | करिष्यथ |
| उ.पु | करिष्यामि | करिष्यावः | करिष्यामः। |

| | | |
|---|---|---|
| प्रविशति | - | प्र - उपसर्गपूर्वक विश् प्रवेशने परस्मैपदी लट् प्र. पु.ए.व। |
| चिन्तयति | - | चिति स्मृत्यां परस्मैपदी लट् प्र. पु.ए.व। |
| आज्ञापयतु | - | आ उपसर्गपूर्वक ज्ञा नियोजने णिचि परस्मैपदी लोट् प्र. पु.ए.व। |
| असि | - | अस भुवि परस्मैपदी लट् म. पु.ए.व। |
| यान्ति | - | या प्रापणे परस्मैपदी लट् प्र. पु.ब.व। |
| भव | - | भू सत्तायां परस्मैपदी लोट् म. पु. ए. व। |
| अवधारय | - | अव उपसर्गपूर्वक धृञ् धरणे णिचि परस्मैपदी लोट् म. पु. ए. व। |
| श्रूयताम् | - | श्रु श्रवणे आत्मनेपदी कर्मणि लोट् प्र. पु.ए.व। |
| अनुगच्छतम् | - | अनु उपसर्गपूर्वक गम् गतौ परस्मैपदी लोट् म. पु. द्वि.व। |
| प्रेक्षिष्ये | - | प्र उपसर्गपूर्वक ईक्ष् दर्शने आत्मनेपदी लृट् उ. पु. ए.व। |
| सन्तु | - | अस भुवि लोट् परस्मैपदी प्र. पु. ब. व। |
| निवर्तिष्येते | - | नि उपसर्गपूर्वक वृतु वर्तने आत्मनेपदी लृट् प्र. पु. द्वि .व। |

# किमधिगतम् ?

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

# शब्दकोशाः।

| संस्कृतम् | संस्कृतम् | कैरली | आङ्गलेयम् | कन्नटम् |
|---|---|---|---|---|
| अन्तरात्मा | मनः | മനസ് | Mind | ಮನಸ್ಸು |
| अप्रतिरथः | प्रतिरोद्धुम् अशक्यः | എതിർക്കാൻ | | ಸೋಲಿಸಲು |
| | | കഴിയാത്തവൻ | Undefeatable | ಸಾಧ್ಯವಿಲ್ಲದವ |
| अवनिः | भूमिः | ഭൂമി | Earth | ಭೂಮಿ |
| अहासीः | अत्याक्षीः | ഉപേക്ഷിച്ചു | Abandoned(you) | ಉಪೇಕ್ಷಿಸಿದ |
| आधयः | दोषकारिण्यः | ദോഷം ചെയ്യുന്നവർ | Harassing | ದೋಷಮಾಡುವವರು |
| गृहिणीपदं | कुटुम्बिनीपदं | വീട്ടമ്മയെന്നസ്ഥാനം | Position as House Wife | ಗೃಹಿಣೀಪದ |
| चिन्तामग्नः | आलोचनाविलीनः | ചിന്തയിൽ മുഴുകിയവൻ | Contemplating | ಚಿಂತಾಮಗ್ನ |
| दक्षिणा | दाक्षिण्यशीला | കാരുണ്യമുള്ളവൾ | Merciful[F] | ಕರುಣೆಯಿರುವವಳು |
| दयितजय- | पतिविजया- | ഭർത്താവിന്റെ വിജയം | The lady who wishes | ಪತಿಯ ಜಯವನ್ನು |
| -मङ्गलैषिणी | -भिलाषिणी | ആഗ്രഹിക്കുന്നവൾ | the victory of husband | ಇಚ್ಛಿಸುವವಳು |
| प्रकामं | यथेष्टम् | യഥേഷ്ടം | Per wish | ಅಭೀಷ್ಟ |
| युक्तवचोभिः | उचितवचनैः | ഉചിതമായ | By befitting | ಸರಿಯಾದ |
| | | വാക്കുകളാൽ | words | ಮಾತುಗಳಿಂದ |
| वनौकसः | काननवासिनः | വനവാസികൾ | Residing in forest | ವನವಾಸಿಗಳು |
| शिवाः | मङ्गलदायकाः | ശുഭദായകങ്ങൾ | Auspicious | ಶುಭದಾಯಕಗಳು |
| सविता | सूर्यः | സൂര്യൻ | Sun | ಸೂರ್ಯ |
| संयमधनान् | आत्मनियन्त्रणयुक्तान् | തപസ്ധനമായിട്ടുള്ളവരെ | Sages | ತಾಪಸರು |

एककम् ४


# संस्कृतिः ।

## आमुखम् ।

विश्वमानवसङ्कल्पः सर्वधर्मसमभावना च भारतसंस्कृतेः मुखमुद्रा भवति। वेदोपनिषदः इतिहासपुराणादीनि धर्मशास्त्राणि च एतत्तत्त्वप्रतिपादकानि भवन्ति। उपदेशात्मिकाः कथा अपि अस्मत्संस्कृतेरवयवाः भवन्ति।

संस्कृतिर्नामके अस्मिन्नेकके क्रिस्तुभागवतात् गिरिप्रभाषणप्रतिपादकाः पञ्चश्लोकाः **ईशोपदेश**नामकेन , कठोपनिषदः नचिकेतसः कथासूचकः पाठः **प्राप्य वरान् निबोधत** इति नामकेन चायोजितौ।

**प्रवेशकम्** - **विविधधर्मावलम्बिनां ग्रन्थानां पट्टिकां करोतु।**



**प्रोफः पि. सी. देवस्या**

प्रोफ. पी.सी देवस्या महोदयः १९०६ तमे वर्षे मार्च्मासस्य २४ तमे दिने जनिमलभत। प्लाक्किल् चाक्को देवस्या इति पूर्णनामधेयस्य अस्य जन्मदेशः कोट्टयं जिल्लायां कुटमालूर्देशः। मलयालसंस्कृतभाषयोः स्नातकोत्तरबिरुदधारी अयं मार् इवनियोस् कलाशालायां प्राध्यापकः आसीत्। अनेन बहवः कृतयः विरचिताः । तासु प्रमुखं भवति क्रिस्तुभागवतम्। इयं रचना १९८० तमे वर्षे केन्द्रीयसाहित्य - अक्कादमी द्वारा पुरस्कृता। केरलसाहित्य - अक्कादमीपुरस्कारः अपि महाभागमेनम् अन्वग्रहीत्। स्वस्य शततमे वयसि २००६ अक्तूबर् १० दिनाङ्के महानुभावोऽयं दिवंगतः।

# पाठः ९

# ईशोपदेशः

वेदैः इतिहासपुराणादिभिः काव्यनाटकादिभिश्च सुसम्पुष्टा भासते संस्कृतभाषा । संस्कृतभाषायां रचिताः अभिज्ञानशाकुन्तलप्रभृतयः बहवः ग्रन्थाः विश्वप्रसिद्धाः एव। न केवलं पौराणिककाले आधुनिककालेऽपि बह्व्यः रचनाः संस्कृतभाषायां रचिताः प्रसिद्धीकृताश्च विराजन्ते। केरलीयाः अनेके संस्कृतोपासकाः कवयः च आसन्, तेषु प्रातःस्मरणीयः भवति क्रिस्तुभागवताख्यस्य महाकाव्यस्य कर्ता प्रोफः पि. सी. देवस्या महोदयः। श्रीयेशुदेवस्य जीवनचरितमवलम्ब्य संस्कृतभाषायां रचितं प्रथमं महाकाव्यं भवति क्रिस्तुभागवतम्। ३३ सर्गात्मके अस्मिन् काव्ये उत्तमकाव्यस्य गुणान् द्रष्टुं शक्नुवन्ति। जोसफस्य विवाहार्थं कन्यादर्शनादारभ्य येशुदेवस्य स्वर्गारोहणं यावत् सम्पूर्णं चरितं काव्येऽस्मिन् वर्णितं वर्तते।

काव्यस्यास्य सप्तदशे सर्गे शिष्यान् प्रति येशुदेवस्य उपदेशाः वर्णिताः उपलभ्यन्ते। पर्वतोपरि स्थित्वा कृतस्यास्य उपदेशस्य ‘गिरिप्रभाषणम्’ इति प्रसिद्धिः। तस्मादुद्धृताः केचन श्लोकाः पाठभागे अत्र समाकलिताः ।

**यूयं स्वधर्माचरणं परेषा -**

**मालोकनार्थं जनतासमक्षम्।**

**मा कार्ष्ट नाकस्थपितुर्न लभ्यो**

**यद्येवमुत्तुङ्गकृपाप्रसादः ।। १**

**पदच्छेदः**

नाकस्थपितुर्न - नाकस्थपितुः + न ।


यद्येवम् - यदि + एवम् ।

**विग्रहः**


**जनतासमक्षम्** -अक्ष्णोः समीपं समक्षम्, जनतायाः समक्षम् । जनानां समूहः जनता । 'ग्रामजनबन्धुभ्यस्तल्'- इति तल्प्रत्ययः ।

**उत्तुङ्गकृपाप्रसादः** -कृपा एव प्रसादः, कृपाप्रसादः उत्तुङ्गश्चासौ कृपाप्रसादश्च।

**नाकस्थपितुः** - नाके स्थितः नाकस्थः, स च असौ पिता च तस्य।



| अन्वयः | अन्वयार्थः |
| --- | --- |
| यूयम् | भवन्तः |
| स्वधर्माचरणम् | स्वधर्मपालनम् |
| परेषाम् | अन्येषाम् |
| आलोकनार्थम् | अवलोकनार्थम् |
| जनतासमक्षम् | जनसमूहस्य पुरतः |



| | |
| --- | --- |
| मा कार्ष्ट | मा निर्वहत |
| एवं यदि | एवं क्रियते चेत् |
| नाकस्थपितुः | स्वर्गस्थस्य ईशस्य |
| उत्तुङ्गकृपाप्रसादः | उत्कृष्टः कृपारूपः प्रसादः |
| न लभ्यः (भवेत्) | न प्राप्तुं शक्यते। |

**भावार्थः**

भवतां धर्माचरणम् अन्येषां दर्शनार्थं जनसमूहस्य पुरतः मा भूत्। यद्येवं क्रियते तर्हि भवन्तः स्वर्गस्थस्य पितुः ईशस्य विशिष्टं कृपाप्रसादं न लभेरन् । धर्माचरणम् आत्मनिर्वृत्यर्थं एव भवेत् इत्याशयः ।

**कोशः**

नाकः - स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः इत्यमरः।

**व्याकरणांशः**

मा कार्ष्ट - डुकृञ् करणे परस्मैपदि लुङ् म.पु.ब.व । माङि लुङ् इति लुङ् । 'न माङ्योग'इति अडागमनिषेधश्च।

अकार्षीः अकार्ष्टम् अकार्ष्ट । प्रथमपुरुषैकवचने आकार्षीत् इति ।

**वृत्तम्**

इन्द्रवज्रा - 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' ।

**ददाति भिक्षां तु भवान् यदा तदा**
**न कारयेत्तूर्यनिनादमग्रतः ।**
**नृणां विलोकं स्तवनं च लिप्सवः**
**सभासु रथ्यासु च दाम्भिकाः यथा ।। २**

**विग्रहः**

तूर्यनिनादः - तूर्यस्य निनादः तूर्यनिनादः, तूर्यते, ताड्यते इति तूर्यम् - वाद्यविशेषः ।

दाम्भिकः - दम्भेन चरति इति दाम्भिकः।

रथ्यासु - रथाय योग्या, तासु।

| अन्वयः | अन्वयार्थः |
|---|---|
| यदा भवान् तु | यदा त्वम् |
| भिक्षां ददाति | याच्ञां ददासि |
| तदा | तस्मिन् समये |
| यथा नृणां विलोकं | यथा मानवानां दर्शनम् |
| स्तवनं च लिप्सवः | स्तुतिं च इच्छन्तः |
| दाम्भिकाः | कपटभक्ताः |
| सभासु | धर्मसभासु |
| रथ्यासु च | वीथिषु च (रथाय योग्या - रथ्या) |
| तूर्यनिनादं | सदुन्दुभिनादं |
| अग्रतः | पुरतः (ददति) |
| (तथा) न कारयेत्। | न कुर्याः। |

**भावार्थः**

हे शिष्य ! यदा त्वं भिक्षां ददासि तदा सर्वान् आहूय तेषां पुरतः मा कार्षीः । यतो हि जनानाम् अवलोकनं तेषां स्तवनं च इच्छन्तः कपटभक्ताः एव धर्मसभासु चत्वरेषु च दुन्दुभिनादैः सहितम् एवं कुर्वन्ति।

**कोशः**

| | | |
|---|---|---|
| भिक्षा | - | याच्ञा भिक्षाऽर्थनार्दना इत्यमरः । |
| सभा | - | समज्या परिषद् गोष्ठी सभा समितिसंसदः इत्यमरः। |
| रथ्या | - | रथ्या प्रतोली विशिखा स्यात् इत्यमरः । |

**वृत्तम्**

| | | |
|---|---|---|
| वंशस्थम् | - | 'जतौ तु वंशस्थमुदीरितं जरौ'। |

**क्रियापदम्**

ददाति डुदाञ् दाने परस्मैपदी लट् प्र. पु. ए व । ददाति - दत्तः- ददति ।

**भिक्षा त्वया दक्षिणहस्तदत्ता**
**मा ज्ञायतां वामकरेण ते सा।**
**दानस्य चैवं निभृतं कृतस्य**
**पिता फलं दास्यति गुप्तदर्शी।। ३**

**पदच्छेदः**

चैवम् - च + एवम्।

**विग्रहः**

दक्षिणहस्तदत्ता - दक्षिणश्चासौ हस्तश्च दक्षिणहस्तः, तेन दत्ता ।

गुप्तदर्शी - गुप्तं दर्शनं शीलमस्येति ।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| त्वया दक्षिणहस्तदत्ता | भवता वामेतरहस्तेन दत्ता |
| सा भिक्षा | सा दानक्रिया |
| ते वामकरेण | भवतः वामहस्तेन |
| मा ज्ञायताम्। | मा प्रत्यभिज्ञायेत। |
| एवं निभृतं कृतस्य | एवं रहसि कृतस्य |
| दानस्य च फलम् | भिक्षादानस्य पुण्यं फलम् |
| गुप्तदर्शी | रहस्यदर्शी |
| पिता दास्यति। | ईशः नूनं दास्यति । |

**भावार्थः**

तव दक्षिणहस्तेन कृतं भिक्षादानं वामहस्तः मा जानातु। एवं रहसि कृतस्य दानस्यापि फलं रहसि दर्शनशीलः ईशः नूनं दास्यति ।

**क्रियापदम्**

दास्यति - डुदाञ् दाने परस्मैपदी लृट् प्र. पु. ए.व ।

**वृत्तम्**

उपजातिः -इन्द्रवज्रोपेन्द्रवज्रयोः सङ्करः ।
'अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ताः'।।

पूर्वोक्तस्तावत् इन्द्रवज्रोपेन्द्रवज्रयोः लक्षणञ्च। तदुभयमपि सांकर्येण यत्र तत्रोपजातिरिति।

**यदा पुनस्त्वं भजनं करोषि**
**तदा समो मा भव दाम्भिकैस्त्वम् ।**
**परावलोकाय हि ये भजन्ति**
**समाजगेहे च चतुष्पथे च ।। ४**

**पदच्छेदः**

| | | |
|---|---|---|
| पुनस्त्वम् | - | पुनः + त्वम् । |
| दाम्भिकैस्त्वम् | - | दाम्भिकैः + त्वम् । |

**विग्रहः**

| | | |
|---|---|---|
| चतुष्पथे | - | चतुर्णां पथां समाहारः चतुष्पथम्, तस्मिन् चतुष्पथे । |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| पुनः यदा त्वम् | पुनः यदा भवान् |
| भजनं करोषि | ईश्वरसेवां करोति |
| तदा त्वम् | तदा भवान् |
| ये परावलोकाय | ये जना अन्येषां पुरतः दर्शनार्थम् |
| समाजगेहे च | सभागृहे च। |

| | |
|---|---|
| चतुष्पथे च | शृङ्गाटके च |
| भजन्ति हि | सेवां कुर्वन्ति हि |
| (तैः) दाम्भिकैः समः | कपटभक्तैः सदृशः |
| मा भव। | मा भवतु । |

**भावार्थः**

पुनः यदा त्वं प्रार्थयसे तदा परेषां पुरतः दर्शनार्थं सभामन्दिरेषु चतुष्पथेषु च भजनं कुर्वद्भिः कपटभक्तैः सदृशो मा भव।

**कोशः**

चतुष्पथः - अपन्थास्त्वपथं तुल्ये शृङ्गाटकचतुष्पथे इत्यमरः।

**व्याकरणांशः**

**चतुष्पथः** - पथिन् शब्दस्य 'तद्धितार्थोत्तरपदसमाहारे च' इति समासः ।

**यदा पुनः प्रार्थयसे तदा गृहं**
**प्रविश्य बद्ध्वा च कवाटमेककः।**
**कुरु स्वतातं प्रति याचनां रहः**
**पिता फलं दास्यति गुप्तदर्शकः।। ५**

| अन्वयः | अन्वयार्थः |
|---|---|
| पुनः यदा (त्वम्) | ततः भवान् यदा |
| प्रार्थयसे | भजनं करोति |
| तदा | तदानीं |
| गृहं प्रविश्य | गृहान्तर्भागं प्रविश्य |
| कवाटं बद्ध्वा च | द्वारं पिधाय च |
| एककः (सन्) | एकाकी (सन्) |

| | |
|---|---|
| स्वतातं प्रति | स्वर्गस्थम् ईशं प्रति |
| रहः याचनां कुरु | गूढरूपेण प्रार्थयताम् |
| गुप्तदर्शकः पिता | गुप्तार्थप्रकाशकः आत्मतत्त्वोद्बोधकः सर्वेशः |
| फलं दास्यति । | प्रार्थनाफलं नूनं दास्यति । |

**भावार्थः**

प्रार्थनासमये भवान् स्वगेहं प्रविश्य द्वारं च पिधाय एकाकी सन् सर्वेश्वरं भजतु। गुप्तपरमतत्वप्रदर्शकः ईशः नूनं फलं दास्यति।

**कोशः**

**रहः** - विविक्तविजनच्छन्ननिश्शलाका तथा रहः ।
रहश्चोपांशु चालिङ्गे रहस्यं तद्भवेत् त्रिषु ।। इत्यमरः

**वृत्तम्**

**वंशस्थम्** - 'जतौ तु वंशस्थमुदीरितं जरौ' ।

## पठनप्रवर्तनानि।

**सङ्घशः एकैकशश्च श्लोकान् कक्ष्यायाम् आलपतु।**
**श्रद्धेयाः अंशाः**

पदच्छेदः ।
पदार्थज्ञानम्।
उचितः तालः ।

**श्लोकानामाशयं संगृह्य वदतु लिखतु च।**
**श्रद्धेयाः अंशाः**

आशयसंग्रहः।
उचितपदस्वीकारः ।
उचिता भाषा ।

**श्लोकानामन्वयं लिखतु ।**

**श्रद्धेयाः अंशाः**

पदच्छेदः ।
विभक्तिज्ञानम्।
पदार्थज्ञानम् ।
आशयग्रहणम् ।

**श्लोकान्तर्गतान् उपदेशान् सञ्चित्य प्रभाषणमेकं कक्ष्यायाम् आयोजयतु।**

**श्रद्धेयाः अंशाः**

आशयग्रहणम् ।
संग्रहः ।
भाषाशुद्धिः ।

**केरलीयानां संस्कृतकवीनां तेषां काव्यानाञ्च पट्टिकां करोतु।**

**श्रद्धेयाः अंशाः**

कवीनां नाम ।
काव्यनाम ।
विभागः ।

' यस्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्' ।। **इति श्रीमद्भगवद्गीता-श्लोकस्याशयः उपर्युक्तस्य कस्य श्लोकस्य आशयेन युज्यते इति विषये चर्चां करोतु।**

***श्रद्धेयाः अंशाः***

भागभाग्त्वम् । चर्चायाः आंशाः। अवतरणम् ।

अनुबन्धः - **बहवः कृतयः, बह्व्यः कृतयः**।
बह्वादिभ्यश्च ४-१-४५ इति सूत्रेण बहुशब्दस्य विकल्पेन ङीष् प्रत्ययो भवति । ङीष् भावे बह्वी,ङीष् भावे बहुः इति।

## चाक्रिकारोहणप्रक्रिया।

**ज्ञानस्य महत्वप्रतिपादकानि सूक्तानि सञ्चिनोतु।**

# पाठः १०

# प्राप्य वरान् निबोधत।



## आमुखम्।

वाजश्रवसः सर्वस्वदक्षिणं विश्वजिन्नाम यागं चकार। यागान्ते ऋत्विग्भ्यः दक्षिणारूपेण धेनूः प्रददौ। ताः सर्वाः अपि अशक्तरोमन्थाः समाप्तदोहाः प्रजननशक्तिरहिताश्चासन्। एवं कृते पितरि तस्य पुत्रः नचिकेताः सर्वं तत् ससूक्ष्मम् अपश्यत्। 'भोक्तुं पातुञ्चासमर्थाः ताः दत्वा पित्रा किं फलं प्राप्स्यते?, पापेभ्य एतेभ्यः पितुः मोचनं कर्तव्यं मया। सोप्यस्ति पुत्रधर्मः' इति सः अचिन्तयच्च।अतः पितरमुपेत्य नचिकेताः पप्रच्छ –'मां कस्मै ददाति?' इति। पुत्रस्य वचनं शृण्वन् पिता किमपि न प्रत्यवदत्। अतः नचिकेताः पौनःपुन्येन तदेवापृच्छत्। एतच्छ्रुत्वा वाजश्रवसः क्रुद्धः सन् 'त्वां मृत्यवे ददामि' इत्युवाच। अनालोच्योक्तं वाचं विचिन्त्य सः पिता दुःखितोऽभवत्। नचिकेताः तु पितरं समाश्वासयन् पितुर्वाक्यपालनाय यमलोकमगात्। स्वपुरमागतं नचिकेतसं यथाकालं सत्कर्तुमसमर्थः यमः प्रायश्चित्तरूपेण नचिकेतसे वरत्रयं प्रदातुमुद्युक्तोऽभवत्। तत्र आत्मानमधिकृत्य यमनचिकेतसोः संवादो सञ्जातः। स एव कठोपनिषदः मुख्यः प्रतिपाद्यः। तस्याः उद्धृतः कश्चिद्भागोऽत्र दत्तः।

संवादमध्ये यमः **स्वयं पण्डितंमन्याः अज्ञाः कुपन्थानं प्राप्नुवन्ति** इति प्रस्तौति।

**अविद्यायामन्तरे वर्तमानाः**
**स्वयं धीराः पण्डितंमन्यमानाः।**
**दन्द्रम्यमाणाः परियन्ति मूढा**
**अन्धेनैव नीयमानाः यथान्धाः।।** **1-2-5**

**पदच्छेदः**

| | | |
|---|---|---|
| अन्धेनैव | – | अन्धेन + एव। |
| यथान्धाः | – | यथा + अन्धाः। |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अविद्यायां | अज्ञाने |
| अन्तरे | मध्ये |
| वर्तमानाः | स्थिताः |
| स्वयं | आत्मानं |
| धीराः | बुद्धिमन्तः |
| पण्डितंमन्यमानाः | स्वयं पण्डिताभिमानिनः। |
| मूढाः | मूढबुद्धयः |
| यथा | येन प्रकारेण |
| अन्धेन एव | दृष्टिविहीनेनैव |
| नीयमानाः | उपनीयमानाः |
| अन्धाः | दृष्टिविहीनाः |
| दन्द्रम्यमाणाः | अत्यन्तं कुटिलमनेकरूपं मार्गं गच्छन्तः |
| तथा परियन्ति । | तेन प्रकारेण भ्रमन्ति। |

**विग्रहवाक्यम्**

| | | |
|---|---|---|
| पण्डितंमन्यमानाः | – | आत्मानं पण्डितं मन्यन्ते ये ते। |
| दन्द्रम्यमाणाः | – | पुनः पुनः द्रम्यमाणः(गम्यमानः) |

**सारांशः**

अज्ञानान्धकारे संस्थिताः तथैव स्वयं बुद्धिमन्तः शास्त्रकुशलिनश्चेति विचिन्तयन्तः अज्ञाः दृष्टिरहितेन नीयमानाः दृष्टिरहिताः इव स्वस्याज्ञानेनैव अतिदुर्घटेषु अज्ञानमार्गेषु परिभ्रमन्ति।

ततः **अज्ञानिनः निरङ्कुशाः इव भवन्ति** इति वदति।

**यस्त्वविज्ञानवान्भव-**
**त्ययुक्तेन मनसा सदा ।**
**तस्येन्द्रियाण्यवश्यानि**
**दुष्टाश्वा इव सारथेः।।** 1-3-5

**पदच्छेदः**

| | |
|---|---|
| यस्त्वविज्ञानवान् | - यः + तु + अविज्ञानवान्। |
| भवत्ययुक्तेन | - भवति + अयुक्तेन। |
| तस्येन्द्रियाणि | - तस्य + इन्द्रियाणि। |
| दुष्टाश्वा इव | - दुष्टाश्वाः + इव। |

**विग्रहवाक्यानि**

| | |
|---|---|
| अज्ञानवान् | – न ज्ञानं अज्ञानम्, तदस्त्यस्मिन्। |
| अवश्यानि | – वशे भवं वश्यं, न वश्यम् अवश्यं,तानि। |
| दुष्टाश्वाः | – दुष्टाः च अमी अश्वाः च। |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यः तु | यः पुमान् तु |
| सदा | सर्वदा |
| अयुक्तेन | अनियन्त्रितेन |
| मनसा | चित्तेन |
| अविज्ञानवान् | विवेकरहितः |
| भवति | अस्ति |
| तस्य | तस्य पुमांसः |
| इन्द्रियाणि | चक्षुरादीनीन्द्रियाणि |
| सारथेः | सूतस्य |
| दुष्टाश्वाः इव | परिचयरहिताः अश्वाः इव |
| अवश्यानि। | अनधीनानि। |

**सारांशः**

अकुशलस्य सूतस्य परिचयरहिताः अश्वाः यथा अनधीनाः भवन्ति तथा अज्ञानिनां चक्षुरादीनि इन्द्रियाणि अनधीनानि भवन्ति।

**अज्ञानं दूरीकर्तुं श्रेष्ठान् उपगच्छतु** इत्युपदिशति।

**उत्तिष्ठत जाग्रत**
**प्राप्य वरान्निबोधत।**
**क्षुरस्य धारा निशिता दुरत्यया**
**दुर्गं पथस्तत्कवयो वदन्ति।।** 1-3-14

**पदच्छेदः**

| | |
|---|---|
| वरान्निबोधत | – वरान् + निबोधत। |
| पथस्तत्कवयो वदन्ति | – पथः + तत् + कवयः + वदन्ति। |

**विग्रहवाक्यम्**

| | |
|---|---|
| दुरत्यया | – दुखेन अत्ययः यस्याः सा। |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| उत्तिष्ठत | उत्थानं कुरु(आत्मज्ञानाभिमुखः भव) |
| जाग्रत | जागरूको भव (आलस्यं त्यज) |
| वरान् | श्रेष्ठान् |
| प्राप्य | अभिगम्य |
| निबोधत | अवगच्छत |
| क्षुरस्य | खड्गस्य |
| धारा | असिपार्श्वधारा |
| निशिता | तीक्ष्णा |
| दुरत्यया | दुष्प्राप्या |
| तत् पथः | तत् मार्गं |
| दुर्गं | दुर्गमम् (दुसंपाद्यमिति यावत्) |
| कवयः | ज्ञानिनः |
| वदन्ति । | कथयन्ति। |

**सारांशः**

विज्ञानस्य मार्गः असिधारा इव तीक्ष्णः गन्तुमशक्यः च भवति इति विज्ञानिनः वदन्ति। अतः हे नचिकेतः! त्वम् उत्थानं कुरु आलस्यं त्यक्त्वा आत्मज्ञानिनः समीपं गत्वा ज्ञानमार्जय।

## पठनप्रवर्तनानि।

**विद्यायाः महत्वप्रतिपादकानि सुभाषितानि सञ्चित्य लिखतु।**

**श्रद्धेयः अंशः -**

- विषयानुबन्धः।

**पाठभागं पठित्वा विद्यायाः महत्वमधिकृत्य चर्चां कृत्वा लघुटिप्पणीं रचयतु।**

**श्रद्धेयाः अंशाः**

उचितभाषाप्रयोगः।

समग्रता।

विषयानुबन्धः।

**अधोदत्तेभ्यः वेदाः वेदाङ्गानि उपनिषदश्च विविच्य पट्टिकां रचयतु।**

| | | | |
|---|---|---|---|
| ऋक् | निरुक्तम् | कठम् | छन्दः |
| सामः | माण्डूक्यम् | यजुः | शिक्षा |
| अथर्वः | तैत्तिरीयम् | ईशम् | व्याकरणम् |

| वेदाः | वेदाङ्गानि | उपनिषदः |
|---|---|---|
| | | |

**प्रसिद्धाः उपनिषत्सूक्तीः समाहृत्य कक्ष्यायाम् अवतारयतु।**

**श्रद्धेयौ अंशौ**

आशयपूर्णता।

विषयवैविध्यम्।

**ध्येयवाक्यत्वेन स्वीकृतानि प्रसिद्धानि उपनिषद्वाक्यानि सञ्चित्य स्फोरकपत्रं निर्माय प्रदर्शयतु।**

**श्रद्धेयाः अंशाः**

विषयवैविध्यम्।

विषयानुबन्धित्वम्।

आकर्षकत्वम्।

**कोशः**

यागः – यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मघः क्रतुः।

जाग्रत इति आर्षप्रयोगः । जागृत इति गृ दीप्तौ धातोः लोट् म.पु.ब.व।

## शब्दकोशः।

| संस्कृतम् | संस्कृतम् | कैरली | आङ्गलेयम् | कन्नटम् |
|---|---|---|---|---|
| अनापदं | आपद्रहितम् | അപകടരഹിതം | Bereft of misfortune | ಅಪಘಾತ ರಹಿತ |
| अविद्या | अज्ञानम् | അജ്ഞാനം | Ignorance | ಅಜ್ಞಾನ |
| उत्तुङ्गः | अतिशयेन तुङ्गः | അത്യധികം ഉയർന്ന | Tallest | ಉನ್ನತದಲ್ಲಿರುವ |
| एककः | एकाकी | ഒറ്റയ്ക്ക് | Alone | ಏಕಾಂಗಿ |

| | | | | |
|---|---|---|---|---|
| कुटिलचित्तः | दुर्बुद्धिः | ദുർബുദ്ധി | Wicked | ದುರ್ಬುದ್ಧಿ |
| गह्वरः | गुहा | ഗുഹ | Cave | ಗುಹೆ |
| चतुष्पथः | शृङ्गाटकम् | നാൽക്കവല | Junction/ | |
| | | | Squire | ನಾಲ್ಕು ದಾರಿ |
| दक्षिणहस्तः | वामेतरहस्तः | വലതുകൈ | Right hand | ಬಲಕೈ |
| नाकः | स्वर्गः | സ്വർഗം | Heaven | ಸ್ವರ್ಗ |
| धारा | असिपार्श्वधारा | വായ്ത്തല | Blade of a | |
| | | | sword | ತುದಿಬಾಗ |
| भग्नाशः | नष्टमनोरथः | നിരാശൻ | One who is | |
| | | | disappointed | ನಿರಾಶೆಯಾದ |
| मधु | मकरन्दः | തേൻ | Honey | ಜೇನು |
| रथ्या | मार्गः | വഴി | Way | ದಾರಿ |
| लिप्सवः | लब्धुम् इच्छवः | കിട്ടാൻ | desire to gain | |
| | | ആഗ്രഹിക്കുന്നവർ | | ಆಗ್ರಹಿಸುವವರು |
| व्यग्रता | तात्पर्यम् | താല്പര്യം | Eagerness | ಆಸಕ್ತಿ |
| सभा | परिषत् | സഭ | Assembly | ಧಾರ್ಮಿಕ ಸಭೆ |
| सारथिः | सूतः | സൂതൻ/തേരാളി | Charioteer | ಸಾರಥಿ |
| क्षुरः | खड्गः | വാൾ | Sword | ಖಡ್ಗ |

# किमधिगतम् ?

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

## टिप्पणीलेखनपुटम् (Notes)

## टिप्पणीलेखनपुटम् (Notes)

# ഭാരതത്തിന്റെ ഭരണഘടന

## ഭാഗം IV ക

## മൗലിക കർത്തവ്യങ്ങൾ

**51 ക. മൗലിക കർത്തവ്യങ്ങൾ - താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ്:**

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാ ദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കു കയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയ സേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാര തത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക. സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സംസ്കാരസമന്വയത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറു ത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്ത ക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽകൃ ഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക.

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസ ത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.

# കുട്ടികളുടെ അവകാശങ്ങൾ

പ്രിയമുള്ള കുട്ടികളേ,

നിങ്ങൾക്കുള്ള അവകാശങ്ങളെന്തെല്ലാമെന്ന് അറിയേണ്ടതില്ലേ? അവകാശങ്ങളെക്കുറിച്ചുള്ള അറിവ് നിങ്ങളുടെ പങ്കാളിത്തം, സംരക്ഷണം, സാമൂഹ്യനീതി എന്നിവ ഉറപ്പാക്കാൻ പ്രേരണയും പ്രചോദനവും നൽകും. നിങ്ങളുടെ അവകാശങ്ങൾ സംരക്ഷിക്കാൻ ഇപ്പോൾ ഒരു കമ്മിഷൻ പ്രവർത്തിക്കുന്നുണ്ട്. കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ എന്നാണ് അതിന്റെ പേര്. എന്തെല്ലാമാണ് നിങ്ങൾക്കുള്ള അവകാശങ്ങൾ എന്നു നോക്കാം.

- സംസാരത്തിനും ആശയപ്രകടനത്തിനുമുള്ള സ്വാതന്ത്ര്യം
- ജീവന്റെയും വ്യക്തിസ്വാതന്ത്ര്യത്തിന്റെയും സംരക്ഷണം
- അതിജീവനത്തിനും പൂർണവികാസത്തിനുമുള്ള അവകാശം
- ജാതി-മത-വർഗ-വർണ ചിന്തകൾക്കതീതമായി ബഹുമാനിക്കപ്പെടാനും അംഗീകരിക്കപ്പെടാനുമുള്ള അവകാശം
- മാനസികവും ശാരീരികവും ലൈംഗികവുമായ പീഡനങ്ങളിൽ നിന്നുള്ള സംരക്ഷണത്തിനും പരിചരണത്തിനുമുള്ള അവകാശം
- പങ്കാളിത്തത്തിനുള്ള അവകാശം
- ബാലവേലയിൽനിന്നും ആപത്കരമായ ജോലികളിൽ നിന്നുമുള്ള മോചനം
- ശൈശവവിവാഹത്തിൽനിന്നുള്ള സംരക്ഷണം
- സ്വന്തം സംസ്കാരം അറിയുന്നതിനും അതനുസരിച്ച് ജീവിക്കുന്നതിനുമുള്ള സ്വാതന്ത്ര്യം
- അവഗണനകളിൽ നിന്നുള്ള സംരക്ഷണം
- സൗജന്യവും നിർബന്ധിതവുമായ വിദ്യാഭ്യാസ അവകാശം
- കളിക്കാനും പഠിക്കാനുമുള്ള അവകാശം
- സ്നേഹവും സുരക്ഷയും നൽകുന്ന കുടുംബവും സമൂഹവും ലഭ്യമാകാനുള്ള അവകാശം

## നിങ്ങളുടെ ചില ഉത്തരവാദിത്വങ്ങൾ

- സ്കൂൾ, പൊതുസംവിധാനങ്ങൾ എന്നിവ നശിപ്പിക്കാതെ സംരക്ഷിക്കുക.
- സ്കൂളിലും പഠനപ്രവർത്തനങ്ങളിലും കൃത്യനിഷ്ഠ പാലിക്കുക.
- സ്കൂൾ അധികാരികളെയും അധ്യാപകരെയും മാതാപിതാക്കളെയും സഹപാഠികളെയും ബഹുമാനിക്കുകയും അംഗീകരിക്കുകയും ചെയ്യുക.
- ജാതി-മത-വർഗ-വർണ ചിന്തകൾക്കതീതമായി മറ്റുള്ളവരെ ബഹുമാനിക്കാനും അംഗീകരിക്കാനും സന്നദ്ധരാവുക.

ബന്ധപ്പെടേണ്ട വിലാസം:

**കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ**
'ശ്രീ ഗണേഷ്', റ്റി.സി. 14/2036, വാൻറോസ് ജംഗ്ഷൻ,
കേരള യൂണിവേഴ്സിറ്റി പി.ഒ, തിരുവനന്തപുരം–34, ഫോൺ: 0471–2326603
ഇ-മെയിൽ: childrights.cpcr@kerala.gov.in, rte.cpcr@kerala.gov.in
വെബ്സൈറ്റ്: www.kescpcr.kerala.gov.in

**ചൈൽഡ് ഹെൽപ്പ്ലൈൻ – 1098, ക്രൈം സ്റ്റോപ്പർ – 1090, നിർഭയ – 1800 425 1400**

**കേരള പോലീസ് ഹെൽപ്പ് ലൈൻ – 0471 - 3243000/44000/45000**

*online R.T.E Monitoring: www.nireekshana.org.in*